"Who indeed are you, two youths who appear valiant and mighty, illumining all the directions like the bright sun? To me, however, you seem to be the two creators of the three worlds. You are indeed Purusha (Rāma) and Pradhāna (prakṛti, Lakshmaṇa), by your supernormal power you move about assuming human forms, in order to relieve the earth of its burden and to protect the devotees. You are causes of the world and you are indeed the very stuff of the world. Having descended on earth as kshatriya princes, you are set to create the world as sport, preserve it and dissolve it. The two of you are the sole and free inspirers, the masters who dwell in the hearts of all beings, verily Nara (Lakshmaṇa) and Nārāyaṇa (Rāma), moving about amidst all of us!" (4,1,12-16):

कौ युवां पुरुषव्याघ्रौ युवानौ वीरसम्मतौ।
द्योतयन्तौ दिशःसर्वाः प्रभया भास्कराविव॥
युवां त्रैलोक्यकर्ताराविति भाति मनो मम।
युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ॥
मायया मानुषाकारौ चरन्ताविव लीलया।
बूभारहरणार्थाय भक्तानां पालनाय च॥
अवतीर्णाविह परौ चरन्तौ क्षत्रियाकृती।
जगत्स्थितिलयौ सर्गं लीलया कर्तुमुद्यतौ॥
स्वतन्त्रौ प्रेरकौ सर्वहृदयस्थाविहेश्वरौ।
नरनारायणौ लोके चरन्ताविति मे मतिः॥

Here it is Rāma (the very personification of supreme wisdom, jñāna-vigraha) that answers

Hanumān, and not Lakshmaṇa as in Vālmiki's poem. It is to be noted that in *Adhyātma-Rāmāyaṇa*, Rāma and Lakshmṇa are together regarded by Hanumān as the Supreme Reality in its twin aspects: spirit and matter, purusha and prakṛti. They together constitute one truth.

In Vālmiki's poem (as also in this version), Sugrīva makes the mistake of focussing his attention only on Rāma, to the exclusion of Lakshmaṇa; and Hanumān quickly corrects it.

When Rāma and Lakshmaṇa are brought by Hanumān to Sugrīva's presence on the Ṛshyamūka hill, they seal their friendship in front of the sacred fire. Then Sugrīva breaks a branch from the Sāla-tree, full of tender leaves, spreads it on the ground, and beckons Rāma to be seated on it; and when Rāma sits on it, Sugrīva also sits on the same seat, ignoring Lashmaṇa altogether. It was Hanumān who notices this lapse, and quickly cuts an even more elegant branch of the sandal-wood tree, full of leaves and soft blossoms, and prepares a seat for Lakshmaṇa; and Hanumān does not share this seat with Lakshmaṇa.

Sugrīva behaves like a king, and his arrogance is seen even in the presence of Rāma. He ignores Hanumān's counsel when he first introduced the brothers to Sugrīva that both the brothers who are most worthy are to be received well, honoured, and respectfully treated together (Vālmīki, 4,8,7):

प्रतिगृह्य अर्चयस्त्वेतौ पूजनीयतमाविमौ ।।

Sugrīva treats only Rāma as his honoured guest but partakes of the seat that was meant for the guest (ibid. 4,5,19).

ततः पर्णबहुलां छित्त्वा शाखां सुपुष्पिताम् ।
सालस्यास्तीर्य सुग्रीवो निषसाद सराघवः ।।

Listen then to what Hanumān immediately did (ibid, 4,5,20):

लक्ष्मणायाथ संहृष्टो हनुमान् प्लवगर्षभः।
शाखां चन्दनवृक्षस्य ददौ परमपुष्पिताम्॥

Later again, after four or five days, the same thing is repeated (4,8,13-15):

सुपुष्पं ईषत्पत्राढ्यं भ्रमरैरुपशोभितम्।
तस्यैकां पर्णबहुलां भंक्त्वा शाखां सुपुष्पिताम्।
सालस्यास्तीर्य सुग्रीवो निषसाद सराघवः॥

and Hanumān:

तावासीनौ ततो दृष्ट्वा हनूमानपि लक्ष्मणम्।
सालशाखां समुत्पाट्य विनीतमुपवेशयत्॥



Sugrīva is an ordinary mortal; he is motivated by self-interest. He is interested in Rāma, not because he is a great soul but only because he might be a useful ally. When during his first confrontation with Vāli, encouraged by Rāma, Rāma does not kill Vāli but allows Vāli to belabour Sugrīva, Sugrīva gets annoyed with Rāma: "You asked me to invite my enemy Vāli to fight; you flaunted great valour then. But what have you done now? You have made me get beaten by him!" (4,12,26)

आह्वयस्वेति मामुक्त्वा दर्शयित्वा च विक्रमम्।
वैरिणा घातयित्वा च किमिदानीं त्वया कृतम्॥

Hanumān's devotion to Rāma, on the other hand, is totally devoid of any motive; not even the longing for liberation is there. This exemplifies the highest form of devotion. Nārāyaṇa-paṇḍitāchārya's *Sumadhva-vijaya* summarizes the significance of Hanumān as a great devotee (mahābhāgavata):

ये ये गुणा नाम जगत्प्रसिद्धा
यं तेषु तेषु च विनिर्दिशन्ति।
साक्षान्महाभागवतप्रवाहम्
श्रीमन्तमेनं हनुमन्तमाहुः ॥

Vālmiki's poem highlights this aspect; this becomes even more evident in *Adhyātma-Rāmāyaṇa.* In the very opening chapter of this work, Rāma after he returned to Ayodhyā, killing Rāvaṇa and recovering Sītā, is duly coronated, and as he sits on the throne with Sitā, he sees Hanumān standing before him with folded hands. Hanumān's mission in life has been fulfilled; he has no more desires or responsibilities.

Rāma tells Sītā: "Look at our friend standing there. He has wanted nothing else but serving me. He has been ever pure in body, speech and mind. He seeks the highest knowledge, and is most brilliant. He is our unflinching devotee. He merits the supreme wisdom. Communicate to him that wisdom". (1,1,29-30):

दृष्ट्वा तदा हनूमन्तं प्राञ्जलिं पुरतः स्थितम्।
कृतकार्यं निराकांक्षं ज्ञानापेक्षं महामतिम्॥
रामः सीतामुवाचेदं ब्रूहि तत्त्वं हनूमते।
निःकल्मषोऽयं ज्ञानस्य पात्रं नौ नित्यभक्तिमान्॥

Accordingly, Sītā teaches Hanumān the sacred secret, which is described as 'Śrī-rāma-hṛdaya' (the heart of Rāma): Rāma is the supreme reality, the Brahman, one without a second, pure existence, pure consciousness and pure bliss. He has no form, name, relation, trait or aspect. He is, and is beyond in our ken. He is of the nature of bliss, absolutely devoid of impurity of any kind, tranquil, immutable and untouched by phenomena. He is all-pervading; he is indeed the very self of all beings. He is self-luminous and unstained (ibid, 32-33).

रामं विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम्।
सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरम्॥
आनन्दं निर्मलं शान्तं निर्विकारं निरञ्जनम्।
सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषम्॥

Sītā herself is the primordial nature (mūla-prakṛti): she creates the worlds, maintains them, and dissolves them by the very presence of Rāma (tasya sannidhi-mātreṇa, ibid., 34). All the effects created by Sītā are, however, ascribed to Rāma, who is changeless and is the self of all.

After Sītā's instruction, Rāma himself instructs Hanuman about the truth of ātma (self), anātmā (the material world) and parātmā (the Supreme Self, viz., Rāma). Rāma tells Hanumān "When one knows this, he will become devoted to me, and partakes of my own nature" (ibid., 44-51):

एतद्विज्ञाय मद्भक्तो मद्भावायोपपद्यते ।।

In the Rāmānandī tradition, Hanumān is not so much a servant, emissary or devotee of Rāma as an āchārya in his own right. He had Sītā as his āchārya, and she was taught



(From Hampi)

the highest truth by Rāma himself. Hanumān in turn gave the teaching (especially the rāma-tāraka-mantra) to Brahmā, from whom the human teachers of the tradition, sages like Vasishṭha, received the doctrine that Rāma is in fact the Brahman, revealed in the Upanishads; that he is merciful (dayālu) and a sure refuge (śaraṇam nityam) for all anxious devotees. *Vālmīki-samhitā,* belonging to this tradition says:-

भगवान् रामचन्द्रो वै परं ब्रह्म श्रुतिश्रुतः।
दयालुः शरणं नित्यं दासानां दीनचेतसाम्॥
इमां सृष्टिं समुत्पाद्य जीवानां हितकाम्यया।
आद्यां शक्तिं महादेवीं श्रीसीतां जनकात्मजाम्॥
तारकं मन्त्रराजं तु श्रावयामास ईश्वरः।
जानकी तु जगन्माता हनूमन्तं गुणाकारम्।
श्रावयामास नूनं हि ब्रह्माणं सुधियां वरम्।
तस्मादेव वसिष्ठर्षिः क्रमादस्मादवातरत्॥

In another work, held high in this tradition, *Sadāśiva-samhitā* Hanumān is extolled as the supreme teacher (paramāchārya):

आचार्यं हनूमन्तं त्यक्त्वा ह्यन्यमुपासते।
क्लिश्यन्ति चैव ते मुग्धा मूलहाः पल्लवाश्रिताः।
हनुमत्परमाचार्यं विनाऽऽचार्यो न कोऽपि च॥

That there is no teacher other than Hanumān is the essential dectrine in this tradition ('iti paddhati-nirṇītam'); although this tradition holds Rāma in the highest esteem, and worships him exclusively, it accords almost equal reverence to Hanumān. Along with the mantra 'ram rāmāya namah', the mantra 'ham hanumate namah' is also recited. The gāyatrīs of (1) Rāma and (2) Hanumān are together employed:

1) दशरथाय विद्महे। सीतावल्लभाय धीमहि। तन्नो रामः प्रचोदयात्॥

2) आञ्जनेयाय विद्महे। महाबलाय धीमहि। तन्नो हनुमान् प्रचोदयात्॥

When in the present decadent age, the souls are outward-oriented and become alienated from the supreme Reality (Brahman or Hari), Hanumān takes the form of numerous teachers (cf. *Sadāśiva-samhitā).*


भविष्यन्ति कलौ घोरे जीवा हरिबहिर्मुखाः।
रामाज्ञा हनुमांश्चैव मध्वाचार्यः प्रभाकरः॥
शङ्करः शङ्करः साक्षात् व्यासो नारायणः स्वयम्।
शेषो रामानुजो रामो रामदत्तो भविष्यति॥

Rāma's worship in this tradition is done as invariably accompanied by Sītā and Hanumān. Rāma is invoked thus:

आगच्छ जानकीनाथ जानक्या सह राघव।
गृहाण मम पूजां च वायुपुत्रेण संयुतः॥

An ancient tradition revived by Madhva, who was himself regarded

as an incarnation of Hanumān, accords Hanumān an all-important role in theory as well as practice. Hanumān is here the great teacher (āchārya), and also one who undertook to accomplish God's mission on earth (bhagavat-kārya-sādhaka). Vāyu became Hanumān in Rāma's incarnation, Bhīma in Krishṇa's incarnation, and Madhva in Vyāsa's dispensation (the present age). We will deal at some length about Hanumān's role in this tradition in a subsequent chapter.


(From Rajasthan)

In the Rāmadāsī tradition also, Hanumān is regarded as the supreme teacher. Samartha-Rāmadas, the founder of this sect, was taught by Hanumān himself: hence list of traditional teachers:

आदिनारायणं विष्णुं ब्रह्माणं च वसिष्ठकम्।
श्रीरामं मारुतिं वन्दे रामदासं जगद्गुरुम्॥

Samartha-Rāmadās, the preceptor of the famous Chhatrapati Śivāji of Maharashtra, popularized the Hanumān cult as a measure to revive, vitalize and spread Hinduism. He was a great devotee of Hanumān (known as Māruti), and installed his shrines in twelve spots which have now become popular pīlgrim-centres.

In the Gauḍīya tradition, Hanumān represents the service mode of devotion (kapipatir dāsye), even as Parikshit the mode of ever keeping in mind God (smaraṇa), Pṛthu the mode of worship (pūjana), Akrūra the mode of prostrations (abhivandana), Arjuna the mode of friendliness (sakhya), Bali the mode of surrendering oneself (ātma-nivedana) (Rūpa-gosvāmi's *Padyāvali,* 63).

The most persistent detail of the tradition regarding Hanumān is that he continues to live to this day as a model devotee and as a protector of the devotees of Rāma, the supreme reality (brahman). As *Śiva-purāṇa* (Śatarudrīya, 20,36) points out, Hanumān's significance is that he spread the cult of devotion to Rāma in the world, being himself a model devotee:

स्थापयामास भूलोके रामभक्तिः कपीश्वरः।
स्वयं भक्तवरो भूत्वा सीतारामसुखप्रदः ॥



Hanumān is among the immortals (chira-jīvī); he lives for ever, as a devotee, as a model bhakta, of Rāma, the supreme reality, not only during his career as a human incarnation, but even after his disappearance from the world (Rāma's birth is calculated from traditional details to have been 4439 B.C. and his disappearance was on 4372 B.C.) Subsequent to Rāma's disappearance, Hanumān retired to Kiṁpurusha-varsha to continue his devotion to Rāma as his own ishṭa-daiva. As already mentioned, this Kiṁpurusha-varsha is the mythical

land to the south of the Hema-kūṭa-hill in the Himālayan ranges.

Bhāgavata (5,19) relates briefly that Hanumān lives here in uninterrupted and self-absorbed devotion to Rāma, the primordial spirit (ādi-purusha), the elder-brother of Lakshmaṇa (śesha) beloved of Sītā (mūla-prakṛti, māyā) and possessed of the six attributes (jñāna, śakti, bala, vīrya, tejas and aiśvarya). Hanumān himself is interested in nothing other than service at the feet of the Lord; he is a supreme devotee: Being a devotee; it is in his very nature to sing the glory of God.

(1)


किंपुरुषे वर्षे भगवन्तमादिपुरुषं लक्ष्मणाग्रजं सीताभिरामं रामं तच्चरणसंनिकर्षाभिरतः परमभागवतो हनुमान्, सह किंपुरुषैः अविरतभक्तिरुपास्ते॥

Among the kimpurushas who inhabit that land, and who join Hanumān in his devotions is Arshṭisheṇa, who is the same as Jāmbavān. The other celestial musicians, the gandharvas, accompany the kimpurushas. The musical fare of intense devotion is altogether capable of accomplishing the supreme felicity, the spiritual perfection of the soul. The Lord is not only the master (bhartṛ), but possessed of all auspicious attributes. Hanumān intently listens to the glory of the Lord being thus sung, and he too sings:

(2)

आर्ष्टिषेणेन सह गन्धर्वैरनुगीयमानां परमकल्याणीं भर्तृभगवत्कथां समुपशृणोति। स्वयं चेदं गायति॥

What Hanumān sings is the eulogy of Rāma as the supreme spirit, the Lord, the master and God. The following seven prostrations, which (namah) constitute Hanumān's song are taken to provide the essential ideas of the six cantoes (kāṇḍas) of Vālmīki's Rāmayāṇa which however was a later



composition. This song is regarded as *Hanumad-rāmāyaṇa,* Hanūmān's own observations about the career of Rāma on earth. The seven brief sentences pertain to the divine attributes of Rāma, which made him the mahā-purusha or maryādā-purusha:

(1) he is worthy of being praised by the most superior human beings (uttama-sloka);

(2) he is endowed with the noblest of traits; and his conduct is unflichingly noble;

(3) he is well-disciplined, his senses are under perfect control, and his mind is well trained;

(4) the entire mankind seeks resort in him, taking him as role-model;

(5) he is the very touchstone for all that is good, great and glorious in the world;

(6) he honours as gods those who seek Brahman in their own hearts and abide in Brahman; and

(7) he is a great person, and a great light for the world.

(3)

ॐ नमो भगवते उत्तमश्लोकाय नमः ॥१॥
(Bāla-kāṇḍa)
ॐ आर्यलक्षणशीलव्रताय नमः ॥२॥
(Ayodhyā-kāṇḍa)
ॐ उपशिक्षितात्मने नमः ॥३॥
(Araṇya-kāṇḍa)
ॐ उपासितलोकाय नमः ॥४॥
(Kishkindhā-kāṇḍa)
ॐ साधुवादनिकषाय नमः ॥५॥
(Sundara-kāṇḍa)
ॐ ब्रह्मण्यदेवाय नमः ॥६॥
(Yuddha-kāṇḍa)
ॐ महापुरुषाय महाराजाय नमः ॥७॥
(Uttara-kāṇḍa)

After these three prose passages there are five ślokas, which contain the essential import of Rāmāyaṇa

(4)

यत्तत् विशुद्धानुभवमात्रमेकम्
स्वतेजसा ध्वस्तगुणव्यवस्थम्।
प्रत्यक् प्रशान्तं सुधियोपलम्भनम्
ह्यनामरूपं निरहं प्रपद्ये॥१॥

Hanumān seeks refuge in Rāma, who is in fact the supreme Brahman, who is pure, who is available only for direct experience, who by his lustre has burnt the play of the three guṇas, who is internal to all beings, who is perfectly tranquil, who is the support of all good folk, and who is devoid of names and forms

मर्त्यावतारस्त्विह मर्त्यशिक्षणम्
रक्षोवधायैव न केवलं विभोः।
कुतोऽन्यथा स्यात् रमतः स्व आत्मनः
सीताकृतानि व्यसनानीश्वरस्य॥२॥

He appeared among the mortals only to instruct how humans, although mortals, may live well and dwell in the supreme reality. The killing of the wicked is but a show; that was not the purpose of the incarnation. He is blissful in himself, and his own nature is bliss. How indeed could he sorrow because of Sītā being abducted? It was only a show. The real reason for the incarnation is to teach the mortals.

न वै स आत्माऽऽत्मवतां सुहृत्तमः
सक्तस्त्रिलोक्यां भगवान्वासुदेवः।
न स्त्रीकृतं कश्मलमश्नुवीत
न लक्ष्मणं चापि विहातुमर्हति॥३॥


He who is the very self of all those who are distinguished by their self-restraint, and kindly friendly to them as no other can be, cannot in reality be tainted by all the three worlds; he is the all-pervasive spirit, in whom all the worlds rest. How indeed could he get desperate when his consort was stolen away, or how could he abandon his brother, Lakshmaṇa? Such episodes are only for show, and not real.

न जन्म नूनं महतो न सौभगम्
न वाक् न बुद्धिर्नाकृतिस्तोषहेतुः।
तैर्यद्विसृष्टानपि नो वनौकसः
चकार सख्ये बत लक्ष्मणाग्रजः॥४॥

Whom does Rāma, the elder brother of Lakshmaṇa, choose as friends? Not the well-born ones, not those who are great in the world, not the wealthy ones, not the eloquent onces, not those who are intelligent, nor those who are handsome and pretty. These traits do not make him happy. He chose indeed us, the monkeys, who are totally devoid of all these traits! It is devotion that he is pleased with.

सुरोऽसुरो वाप्यथ वानरो नरः
सर्वात्मना यः सुकृतज्ञमुत्तमम्।
भजेत रामं मनुजाकृतिं हरिम्
य उत्तराननयत्कोसलान् दिवमिति॥५॥

Whoever seeks complete refuge in him, be he a god, demon, ape or human being, will surely be protected by Rāma. He is in truth the inner controller of all beings (hari), Vishṇu in human form. How else could all creatures in Uttara-kosala get transported to the celestial realms?



CHAPTER FOUR

WORSHIP RITUALS FOR HANUMĀN

श्रीमदाञ्जनेय सुप्रभातम्॥

अमलकनकवर्णं प्रज्वलत्पावकाक्षम्
सरसिजनिभवक्त्रं सर्वदा सुप्रसन्नम्।
रणरघनगात्रं कुण्डलालंकृताङ्गम्
परजयकरवालं रामदूतं नामामि॥

श्रीरामचन्द्रचरणाम्वुजमत्तभृङ्ग
श्रीराममन्त्रजपशीलभवाब्धिपोत।
श्रीजानकीहृदयतापनिवारमूर्ते
श्रीवीर धीर हनुमन् तव सुप्रभातम्॥१॥

श्रीरामदिव्यचरितामृतस्वादलोल
श्रीरामकिङ्करगुणाकर दीनवन्धो।
श्रीरामभक्त जगदेक महोग्रशौर्य
श्रीवीर धीर हनुमन्तव सुप्रभातम्॥२॥

सुग्रीवमित्र कपिशेखर पुण्यमूर्ते
सुग्रीवराघव समागमदिव्यकीर्ते।
सुग्रीवमन्त्रिवरशूरकुलाग्रगण्य
श्रीवीर धीर हनुमन् तव सुप्रभातम्॥३॥

भक्तार्तिभञ्जन दयाकर योगिवन्द्य
श्रीकेसरीप्रियतनूज सुवर्णदेह।
श्रीभास्करात्मज मनोऽम्वुजचञ्चरीक
श्रीवीर धीर हनुमन् तव सुप्रभातम्॥४॥

श्रीमारुतप्रियतनूज महावलाढ्य
मैनाकवन्दितपदाम्बुज दण्डितारिन्।
श्री उष्ट्रवाहन सुलक्षणलक्षिताङ्ग
श्री वीर धीर हनुमन् तव सुप्रभातम्॥५॥

पञ्चाननास्य भवभीतिहरस्य राम-
पादाब्जसेवनपरस्य परात्परस्य
श्री अञ्जनाप्रियसुतस्य सुविग्रहस्य
श्री वीर धीर हनुमन् तव सुप्रभातम्॥६॥

गन्धर्वयक्षभुजगाधिपकिंनराश्च
आदित्यविश्ववसुरुद्रसुरर्षिसंघाः।
संकीर्तयन्ति तव दिव्यनामपंक्तिम्
श्री वीर धीर हनुमन् तव सुप्रभातम्॥७॥

श्री गौतमी-च्यवन तुम्बुरुनारदात्रि-
मैत्रेयव्यासजनकादि महर्षिसंघाः।
गायन्ति हर्षभरितास्तव दिव्यकीर्तिम्।
श्री वीर धीर हनुमन् तव सुप्रभातम्॥८॥

भृङ्गावली च मकरन्दरसं पिवेद्ये
कूलन्त्युदार्थमधुरं चरणायुधाश्च।
देवालये घनगभीर सुशंखघोषः
निर्यान्ति वीर हनुमंस्तव सुप्रभातम्॥९॥

पम्पासरोवरसुपुण्यपवित्रतीर्थ-
मादाय हेमकलशैश्च महर्षिसंघाः।
तिष्टन्ति त्वच्चरणपङ्कजसेवनार्थं
श्री वीर धीर हनुमन् तव सुप्रभातम्॥१०॥

श्रीसूर्यपुत्रिप्रियनाथ मनोज्ञमूर्ते
वातात्मजात कपिवीर सुपिंगलाक्ष।
सञ्जीवनाय रघुवीर सुभक्तवर्य
श्री वीर धीर हनुमन् तव सुप्रभातम् ॥११॥



ಹನುಮಂತ




ವೀಣಾಂಜನೇಯ

श्रीहनूमत्स्मरणम् ॥

प्रातः स्मरामि हनुमन्तमनन्तवीर्यम्
श्रीरामचन्द्रचरणाम्बुजचञ्चरीकम्।
लङ्कापुरीदहननन्दितदेवृन्दम्
सर्वार्थसिद्धिसदनं प्रथितप्रभावम्॥१॥

माध्यं नमामि वृजिनार्णवतारणैका-
धीरं शरण्यमुदितानुपमप्रभावम्।
सीताऽऽधिसिन्धुपरिशोषणकर्मदक्षम्
वन्दारुकल्पतरुमव्ययमाञ्जनेयम्॥२॥

सायं भजामि शरणोपसृताखिलार्ति-
पुञ्जप्रणाशनविधौ प्रथितप्रतापम्।
अक्षान्तकं सकलराक्षसवंशधूम-
केतुं प्रमोदितविदेहसुतं दयालुम्॥३॥



श्रीहनुमत्स्तोत्रम् विभीषणोक्तम्॥

The eulogy of Hanumān ascribed to Vibhīshaṇa is included in the section on the dialogue between Vibhīshaṇa and Guruḍa in Sudarśana-samhitā; it is said in the text that it was communicated by Garuḍa)

नमो हनुमते तुभ्यं नमो मारुतसूनवे।
नमः श्रीरामभक्ताय श्यामास्याय
च ते नमः ॥१॥

नमो वानरवीराय सुग्रीवसख्यकारिणे।
लङ्काविदाहनार्थाय हेलासागरतारिणे॥२॥

सीताशोकविनाशाय राममुद्राधराय च।
रावणान्तकुलच्छेदकारिणे ते नमो नमः ॥३॥

मेघनादमखध्वंसकारिणे ते नमो नमः।
अशोकवनविध्वंसकारिणे भयहारिणे॥४॥

वायुपुत्राय वीराय आकाशोदरगामिने।
वनपालशिरश्छेद लङ्काप्रासादभञ्जिने॥५॥

ज्वलत्कनकवर्णाय दीर्घलांगूलधारिणे।
सौमित्रिजयदात्रे च रामदूताय ते नमः॥६॥

अक्षस्य वधकर्त्रे च ब्रह्मपाशनिवारिणे।
लक्ष्मणाङ्गमहाशक्तिघातक्षतविनाशिने॥७॥

रक्षोघ्नाय रिपुघ्नाय भूतघ्नाय च ते नमः।
ऋक्षवानरवीरौघप्राणदाय नमो नमः ॥८॥

परसैन्यबलघ्नाय शस्त्रास्त्रघ्नाय ते नमः।
विषघ्नाय द्विषघ्नाय ज्वरघ्नाय च ते नमः॥९॥

महाभयरिपुघ्नाय भक्तत्राणैककारिणे।
परप्रेरितमन्त्राणां यन्त्राणां स्तम्भकारिणे॥१०॥

पयः पाषाणतरणकारणाय नमो नमः।
वालार्कमण्डलग्रासकारिणे भवतारिणे ॥११॥

नखायुधाय भीमाय दन्तायुधधराय च।
रिपुमायाविनाशाय रामाज्ञालोकरक्षिणे॥१२॥

प्रतिग्रामस्थितायाथ रक्षोभूतवधार्थिने।
करालशैलशस्त्राय द्रुमशस्त्राय ते नमः॥१३॥

बालैकब्रह्मचर्याय रुद्रमूर्तिधराय च।
विहङ्गमाय सर्वाय वज्रदेहाय ते नमः॥१४॥

कौपीनवाससे तुभ्यं रामभक्तिरताय च।
दक्षिणाशाभास्कराय शतचन्द्रोदयात्मने॥१५॥

कृत्याक्षतव्यथघ्नाय सर्वक्लेशहराय च।
स्वाम्याज्ञापार्थसंग्रामसंख्ये सञ्जयधारिणे॥१६॥

भक्तान्तदिव्यवादेषु संग्रामे जयदायिने।
किल्किलाबुबुकोच्चार घोरशब्दकराय च॥१७॥

सर्पाग्निव्याधिसंस्तम्भकारिणे वनचारिणे।
सदा वनफलाहारसंतृप्ताय विशेषतः ॥१८॥

महार्णवशिलाबद्धसेतुबन्धाय ते नमः।
वादे विवादे संग्रामे भये घोरे महावने॥१९॥

सिंहव्याघ्रादि चौरेभ्यः स्तोत्रपाठाद् भयं न हि।
दिव्ये भूतभये व्याधौ विषे
स्थावर जङ्गमे ॥२०॥


राजशस्त्रभये चोग्रे तथा ग्रहभयेषु च।
जले सर्वे महावृष्टौ दुर्भिक्षे प्राणसंप्लवे॥२१॥

पठेत् स्तोत्रं प्रमुच्येत भयेभ्यः सर्वतो नरः।
तस्य क्वापि भयं नास्ति हनुमत्स्तवपाठतः ॥२२॥

सर्वदा वै त्रिकालं च पठनीयमिदं स्तवम्।
सर्वान् कामानवाप्नोति नात्र
कार्या विचारणा॥२३॥

विभीषणकृतं स्तोत्रं तार्क्ष्येण समुदीरितम्।
ये पठिष्यन्ति भक्त्या वै
सिद्धयस्तत्करे स्थिताः ॥२४॥

इति विभीषणोक्तं श्रीहनुमत्स्तोत्रम् समाप्तम्॥



YANTRODDHĀRA-YANTRA

श्रीहनुमत्पञ्चरत्नस्तोत्रम् ॥

(This stotra in five verses is usually ascribed, wrongly however, to the great Śaṃkarāchārya. This was composed by a Śaṃkaracharya of the Kāśī-pīṭha in later times).

वीताखिलविषयेच्छं जातानन्दाश्रुपुलकमत्यच्छम् ।
सीतापतिदूताद्यं वातात्मजमद्य भावये हृद्यम् ॥१॥

तरुणारुणमुखकमलं करुणारसपूरपूरिताङ्गम् ।
सञ्जीवनमाशासे
मञ्जुलमहिमानमञ्जनाभाग्यम् ॥२॥

शम्बरवैरिशरातिगमम्बुजदलविपुललोचनोदारम् ।
कम्बुगलमनिलदिष्टं
विम्बज्वलितोष्ठमेकमवलम्बे ॥३॥

दूरीकृतसीतार्तिः प्रकटीकृतरामवैभवस्फूर्तिः ।
दारितदशमुखकीर्तिः पुरतो मम भातु
हनुमतो मूर्तिः ॥४॥

वानरनिकराध्यक्षं दानवकुलकुमुदरविकरसदृक्षम् ।
दीनजनावनदीक्षं पवनतपःपाकपुञ्जमद्राक्षम् ॥५॥

एतत्पवनसुतस्य स्तोत्रं यः पठति पञ्चरत्नाख्यम् ।
चिरमिह निखिलान् भोगान्भुक्त्वा
श्रीरामभक्तिभाग् भवति ॥

श्रीमद्गोस्वामि तुलसीदास कृतसङ्कटमोचनहनुमत्स्तोत्रम् ॥

This stotra in eight verses was composed by the great saint-poet Tulasī-dāsa, (1543-1623) whose *Rāmacharitamānasa* in Hindi has justly become immortal. His stotra in Sanskrit celebrates Hanumān as the reliever of distress (saṅkaṭa-mochana).

ततोऽहं तुलसीदासः स्मरामि रघुनन्दनम्।
हनूमन्तं तत्पुरस्ताद्रक्षार्थे भक्तरक्षकम्॥१॥

हनूमान्नञ्जनासूनो वायुपुत्र महाबल।
महालाङ्गूलनिक्षेपनिहन्ताखिलराक्षस॥२॥

अक्षवक्षोविनिक्षेपकुलिशाग्रनखाञ्चित।
श्रीरामहृदयानन्द विपत्तौ शरणं भव॥३॥

उल्लंघ्य सागरं येन छायाग्राही निपातिता।
सिंहनाद हतामित्र विपत्तौ शरणं भव॥४॥

लक्ष्मणो निहते भूमावानीत्वा द्रोणाचलं ततः।
यया जीवितवानद्य तां शक्तिं प्रकटीकुरु॥५॥

येन लङ्केश्वरो वीरो निःशङ्कं विजितस्त्रयम्।
दुर्निरीक्ष्योऽपि देवानां तद्बलं दर्शयाधुना॥६॥

यया लङ्का प्रविश्य त्वं ज्ञातवान् जानकीं स्वयम्।
रावणान्तःपुरेऽत्युग्रे तां बुद्धिं प्रकटीकुरु॥७॥

रुद्रावतार भक्तार्तिविमोचन महाभुज।
कपिराज प्रपन्नस्त्वाः शरणं भव रक्ष माम्॥८॥

इत्यष्टकं हनुमतो यः पठेच्छ्रद्धयान्वितः।
सर्वकष्टविनिर्मुक्तो लभते वांछितं फलम्॥

श्रीहनुमद्देवता लघुपूजाक्रमः ॥
BRIEF WORSHIP OF HANUMĀN

I

1. ध्यानम् ॥ (contemplation on the deity for worship)
अतुलितवलधामं स्वर्णशैलाभदेहम्
दनुजवनकृशानुं ज्ञानिनामग्रगण्यम्।
सकलगुणनिधानं वानराणामधीशम्
रघुपतिप्रियभक्तं वातजातं नमामि
(श्रीसीतासमेतश्रीरामपादसेवादुरन्धराय नमः ॥ ध्यायामि ॥ ध्यानं समर्पयामि ॥)

2. आवाहनम् ॥ (Invocation of the deity for worship with the following verse)
आगच्छ हनुमद्देव त्वं सुवर्चलया सह।
पूजासमाप्तिपर्यन्तं भव सन्निहितो मुदा ॥
श्रीसीतासमेतश्रीरामपादसेवादुरन्धराय नमः ॥
आवाहमामि ॥ आवाहनं समर्पयामि ॥
(Inviting the deity to be present during the worship, along with his spouse, Suvarchalā)

3. आसनम् ॥ (Offering of a seat for the deity to receive worship)
भीमाग्रज महाप्राज्ञ त्वं ममाभिमुखो भव।
श्रीरामसेवक श्रीमन् प्रसीद जगतां पते ॥
(हे स्वमिन्, स्थिरो भव, वरदो भव, सुमुखो भव, सुप्रसन्नोभव। स्थिरासनं कुरु।)
(Begging the deity to be steady in the seat (comfortably), and be benevolent towards the devotee.)

4. सिंहासनसमर्पणम् ॥ (Offering of a throne as the seat)
देव देव जगन्नाथ केसरिप्रियनन्दन।
रत्नसिंहासनं तुभ्यं दास्यामि हनुमत्प्रभो ॥
श्रीसीतासमेतश्रीरामपादसेवादुरन्धराय नमः।
नवरत्नखचित स्वर्ण सिंहासनं समर्पयामि ॥
(The seat that is offered is imagined by the devotee to be a throne of gold studded with precious stones)

5. पाद्यम् ॥ (Offering of water for the feet)
योगिध्येयांध्रिपद्माय जगतां पतये नमः।
पाद्यं मयार्पितं देव गृहाण पुरुषोत्तम ॥
श्रीसीतासमेतश्रीरामपादसेवा दुरन्धराय नमः।
पादयोः पाद्यं समर्पयामि ॥
(Water is offered for the sacred feet of the deity, worshipped by the great ascetics and devotees.)

6. अर्घ्यं॥ (Offering of water for the hands):
लक्ष्मणप्राणसंरक्ष सीताशोकविनाशन।
गृहाणार्घ्यं मया दत्तं अञ्जनाप्रियनन्दन॥
श्रीसीतासमेतश्रीरामपादसेवादुरन्धराय नमः।
हस्तयोः अर्घ्यं समर्पयामि॥
(Water is offered for the cleansing of the hands of the deity).

7. आचमनीयम्॥ (Water for ceremonial sipping)
वालाग्रसेतुबन्धाय शताननवधाय च।
तुभ्यमाचमनं दत्तं प्रतिगृह्णीष्व मारुते॥
श्री सीतासमेत श्रीरामपादसेवा दुरन्धराय नमः। मुखे आचमनीयं समर्पयामि॥
(Ceremonial sipping is prelude to all ritualistic involvement; water is offered to the mouth)

8. मधुपर्कम्॥ (Ceremonial honey-offering)
अर्जुनध्वजसंवास दशाननमदापह।
मधुपर्कं प्रदास्यामि हनुमत्प्रतिगृह्यताम्॥
श्रीसीतासमेतश्रीरामपादसेवादुरन्धराय नमः।
मधुपर्कं समर्पयामि॥
(Madhuparka is respectful offering of honey, mixed with milk, curds and clarified butter for an honoured guest).

9. स्नानम्॥ (Formal bath)
गङ्गादि सर्वतीर्थेभ्यः समानीतैर्नवोदकैः।
भवन्तं स्नपयिष्यामि कपिनायक गृह्यताम्॥
श्रीसीतासमेतश्रीरामपादसेवादुरन्धराय नमः।
शुद्धोदकस्नानं समर्पयामि॥
(The deity is bathed with fresh water, duly sanctified)

10. वस्त्रयुग्मम्॥ (Presentation of garments)
पीताम्बरमिदं तुभ्यं तप्तहाटकसन्निभम्।
दास्यामि वानरश्रेष्ठ संगृहाण नमोऽस्तु ते॥
श्रीसीतासमेतश्रीरामपादसेवादुरन्धराय नमः।
वस्त्रयुग्मं समर्पयामि॥
(The deity is dried up after wash, and is presented with a pair of yellow-coloured silken garments)


11. उत्तरीयम्॥ (Presentation of upper cloth)
उत्तरीयं तु दास्यामि संसारोत्तारकारण।
गृहाण च मया प्रीत्या स्तवतोस्मिंस्तव पादयोः॥
(Upper cloth is presented for the deity)

12. आभरणानि॥ (offering of ornaments)
भूषणानि महार्हाणि किरीटप्रमुखान्यहम्।
तुभ्यं दास्यामि सर्वेश गृहाण कपिनायक॥
श्रीसीतासमेतश्रीरामपादसेवादुरन्धराय नमः।
आभरणानि समर्पयामि॥

(ornaments of various kinds are presented for decorating the deity)

13. चन्दनम् ॥ (Offering of sandal-paste)

कस्तूरीकुङ्कुमान्मिश्रं कर्पूरागरुवासितम्।
श्रीचन्दनं तु दास्यामि गृह्यतां
हनुमत्प्रभो ॥





ಪಂಚಮುಖಿ ಆಂಜನೇಯ



(श्रीसीतासमेतश्रीरामपादसेवादुरन्धराय नमः।
दिव्यश्रीचन्दनं समर्पयामि॥)

(Sandal-paste mixed with unguents of sweet perfume is presented for the deity for application on the body)

14. पुष्पाणि॥ (Offering of flowers)

सुगन्धीनि सुरूपाणि वन्यानि विविधानि च।
चम्पकादीनि पुष्पाणि
कमालान्युत्पलानि च॥
तुलसीदल बिल्वानि मनसा कल्पितानि च।
गृहाण हनुमद्देव प्रणतोऽस्मि पदाम्बुजे॥
श्रीसीतासमेतश्रीरामपादसेवादुरन्धराय नमः।
पुष्पाणि समर्पयामि॥

(Fragrant flowers of various kinds are offered for the deity, along with sacred leaves like tulasī and bilva).

15. अक्षताः (Consecrated rice-grains)

शालीयानक्षतान् रम्यान् पद्मरागसमप्रभान्।
अखण्डान् खण्डितध्वान्त स्वीकुरुष्व
दयानिधे॥
श्रीसीतासमेतश्रीरामपादसेवादुरन्धराय नमः।
अक्षतान्समर्पयामि॥

(Unbroken rice-grains, coloured red with Kumkum are offered to the deity to mark the end of the worship-ritual in the first stage)

II

अथ अङ्गपूजा॥ (Worship of the several limbs of the deity, each with a name of adoration)

1. मारुतये नमः। पादौ पूजयामि॥ (feet)
2. सुग्रीवसखाय नमः। गुल्फौ पूजयामि॥ (heels)
3. अङ्गदमित्राय नमः। जङ्घे पूजयामि॥ (lower legs)
4. रामदासाय नमः। ऊरु पूजयामि॥ (thighs)
5. अक्षघ्नाय नमः। कटिं पूजयामि॥ (loins)
6. लङ्कादहनाय नमः। बालं पूजयामि॥ (tail)
7. सञ्जीवन नगाहर्त्रे नमः। स्कन्धौ पूजयामि॥ (shoulders)
8. सौमित्रिप्राणदात्रे नमः। वक्षःस्थलं पूजयामि॥ (chest)
9. कुण्ठितदशकण्ठाय नमः। कण्ठं पूजयामि॥ (neck)
10. रामाभिषेककारिणे नमः। हस्तौ पूजयामि॥ (hands)
11. मन्त्ररचितरामायणाय नमः। वक्त्रं पूजयामि॥ (mouth)
12. प्रसन्नवदनाय नमः। वदनं पूजयामि॥ (face)
13. पिङ्गलनेत्राय नमः। नेत्रे पूजयामि॥ (eyes)
14. श्रुतिपारायणाय नमः। श्रोत्रे पूजयामि॥ (ears)
15. ऊर्ध्वपुण्ड्रधारिणे नमः। ललाटं पूजयामि॥ (fore-head)
16. मणिकण्ठमालिकाय नमः। शिरः पूजयामि॥ (head)
17. सर्वाभीष्टप्रदाय नमः। सर्वाण्यङ्गानि पूजयामि॥ (all parts of the body)

III

अथ अष्टोत्तरशतनामपूजा ॥

(Worship with a hundred and eight names)

1. ॐ आञ्जनेयाय नमः ॥१॥
2. ॐ महावीराय नमः ॥२॥
3. ॐ तत्त्वज्ञानप्रदाय नमः ॥३॥
4. ॐ सीतादेवीमुद्राप्रदायकाय नमः ॥४॥
5. ॐ सर्वग्रहविनाशिने नमः ॥५॥
6. ॐ भीमसेनसहायकृते नमः ॥६॥
7. ॐ परविद्यापरीहाराय नमः ॥७॥
8. ॐ परशौर्यविनाशकाय नमः ॥८॥
9. ॐ परयन्त्रनिराकर्त्रे नमः ॥९॥
10. ॐ परमन्त्रप्रभेदकाय नमः ॥१०॥

11. ॐ सर्वदुःखहराय नमः ॥११॥
12. ॐ सर्वलोकचारिणे नमः ॥१२॥
13. ॐ मनोजवाय नमः ॥१३॥
14. ॐ परिजातद्रुममूलस्थाय नमः ॥१४॥
15. ॐ अशोकवनिकाच्छेत्रे नमः ॥१५॥
16. ॐ सर्वमायाविभञ्जकाय नमः ॥१६॥
17. ॐ सर्वबन्धविमोक्त्रे नमः ॥१७॥
18. ॐ रक्षोविध्वंसकारकाय नमः ॥१८॥
19. ॐ सर्वयन्त्रात्मकाय नमः ॥१९॥
20. ॐ कपीश्वराय नमः ॥२०॥

21. ॐ महाकायाय नमः ॥२१॥
22. ॐ सर्वरोगहराय नमः ॥२२॥
23. ॐ सर्वविद्यासम्पत्प्रदायकाय नमः ॥२३॥
24. ॐ कपिसेनानायकाय नमः ॥२४॥
25. ॐ भविष्यच्चतुराननाय नमः ॥२५॥
26. ॐ कुमारब्रह्मचारिणे नमः ॥२६॥
27. ॐ रत्नकुण्डलदीप्तिमते नमः ॥२७॥
28. ॐ सञ्चलद् बालसन्नद्धलम्बमानाय नमः ॥२८॥
29. ॐ हनुमते नमः ॥२९॥
30. ॐ मरुतात्मजाय नमः ॥३०॥

31. ॐ महाबलपराक्रमाय नमः ॥३१॥
32. ॐ कारागृहविमोक्त्रे नमः ॥३२॥
33. ॐ शृङ्खलाबन्धमोचकाय नमः ॥३३॥
34. ॐ सागरोत्तारकाय नमः ॥३४॥
35. ॐ प्राज्ञाय नमः ॥३५॥
36. ॐ रामदूताय नमः ॥३६॥
37. ॐ प्रतापवते नमः ॥३७॥
38. ॐ वानराय नमः ॥३८॥
39. ॐ लङ्किणीभञ्जकाय नमः ॥३९॥
40. ॐ श्रीमते नमः ॥४०॥

41. ॐ सर्वमन्त्रस्वरूपिणे नमः ॥४१॥
42. ॐ सर्वतन्त्रस्वरूपिणे नमः ॥४२॥
43. ॐ गन्धमादनशैलस्थाय नमः ॥४३॥
44. ॐ लङ्कापुरविदाहकाय नमः ॥४४॥
45. ॐ सुग्रीवसचिवाय नमः ॥४५॥
46. ॐ धीराय नमः ॥४६॥
47. ॐ शूराय नमः ॥४७॥
48. ॐ दैत्यकुलान्तकाय नमः ॥४८॥
49. ॐ सुरार्चिताय नमः ॥४९॥
50. ॐ महातेजसे नमः ॥५०॥

51. ॐ प्रभवे नमः ॥५१॥
52. ॐ बलसिद्धिकराय नमः ॥५२॥
53. ॐ केसरीसुताय नमः ॥५३॥
54. ॐ सीताशोकनिवारकाय नमः ॥५४॥

55. ॐ अञ्जनागर्भसम्भूताय नमः ॥५५॥
56. ॐ शिखोज्ज्वलाय नमः ॥५६॥
57. ॐ गन्धर्वविद्यातत्त्वज्ञाय नमः ॥५७॥
58. ॐ लक्ष्मणप्राणदात्रे नमः ॥५८॥
59. ॐ वज्रकायाय नमः ॥५९॥
60. ॐ महाद्युतये नमः ॥६०॥

61. ॐ चिरजीविने नमः ॥६१॥
62. ॐ रामभक्ताय नमः ॥६२॥
63. ॐ दैत्यकार्यविघातकाय नमः ॥६३॥
64. ॐ अक्षहन्त्रे नमः ॥६४॥
65. ॐ काञ्चनाभाय नमः ॥६५॥
66. ॐ पञ्चवक्त्राय नमः ॥६६॥
67. ॐ महातपसे नमः ॥६७॥
68. ॐ विजितेन्द्रियाय नमः ॥६८॥
69. ॐ सिंहिकाप्राणभञ्जनाय नमः ॥६९॥
70. ॐ महारावणमर्दनाय नमः ॥७०॥

71. ॐ स्फटिकाभाय नमः ॥७१॥
72. ॐ वागधीशाय नमः ॥७२॥
73. ॐ नवव्याकरणपण्डिताय नमः ॥७३॥
74. ॐ चतुर्बाहवे नमः ॥७४॥
75. ॐ दीनबन्धवे नमः ॥७५॥
76. ॐ महात्मने नमः ॥७६॥
77. ॐ भक्तवत्सलाय नमः ॥७७॥
78. ॐ रामचूडामणिप्रदाय नमः ॥७८॥
79. ॐ कामरूपिणे नमः ॥७९॥
80. ॐ पिङ्गलाक्षाय नमः॥८०॥

81. ॐ वार्धिमैनाकपूजिताय नमः ॥८१॥
82. ॐ कबलीकृतमार्तण्डमण्डलाय नमः ॥८२॥
83. ॐ बालर्कसदृशाननाय नमः ॥८३॥
84. ॐ विभीषणप्रियकराय नमः ॥८४॥
85. ॐ दशग्रीवकुलान्तकाय नमः ॥८५॥
86. ॐ दान्ताय नमः ॥८६॥
87. ॐ शान्ताय नमः ॥८७॥
88. ॐ प्रसन्नात्मने नमः ॥८८॥
89. ॐ शतकण्ठमदापहर्ते नमः ॥८९॥
90. ॐ योगिने नमः ॥९०॥

91. ॐ रामकथालोलाय नमः ॥९१॥
92. ॐ सीतान्वेषणपण्डिताय नमः ॥९२॥
93. ॐ वज्रदंष्ट्राय नमः ॥९३॥
94. ॐ वज्रनखाय नमः ॥९४॥
95. ॐ रुद्रवीर्यसमुद्भवाय नमः ॥९५॥
96. ॐ सञ्जीवनगाहर्त्रे नमः ॥९६॥
97. ॐ शुचये नमः ॥९७॥
98. ॐ वाग्मिने नमः ॥९८॥
99. ॐ दृढव्रताय नमः ॥९९॥
100. ॐ कालनेमिप्रमथाय नमः ॥१००॥

101. ॐ हरिमर्कटमर्कटाय नमः ॥१०१॥
102. ॐ इन्द्रजित्प्रहितामोघ
ब्रह्मास्त्रविनिवारकाय नमः ॥१०३॥
103. ॐ पार्थध्वजाग्रसंवासिने नमः ॥१०३॥
104. ॐ शरपञ्जरभेदकाय नमः ॥१०४॥
105. ॐ लोकपूज्याय नमः ॥१०५॥
106. ॐ जाम्बवत्प्रीतिवर्धनाय नमः ॥१०६॥
107. ॐ मारुतये नमः ॥१०७॥
108. ॐ सीतासमेतश्रीरामपादसेवादुरन्धराय
नमः ॥१०८॥

IV

अथ पूजासमापनम्।

(Termination of the worship ritual with incense and waving of light in front of the deity)

1. धूपमाघ्रापयामि। दीपं दर्शयामि। धूपदीपानन्तरं आचमनीयं समर्पयामि॥

2. नैवद्यम्। मध्ये मध्ये पानीयं समर्पयामि। उत्तरापोशनं समर्पयामि॥ (Food offering)

3. हस्तौ प्रक्षालयामि। पादौ प्रक्षालयामि। (washing the hands and feet) शुद्धाचमनीयं समर्पयामि। (ceremonial sipping of water)

4. ताम्बूलं समर्पयामि। (offering of tāmbūla)

5. नीराजनं समर्पयामि। (final waving of light in front of the deity) नीराजनातन्तरं आचमनीयं समर्पयामि। (final sipping of water to mark the closure of the worship ritual).

6. सुवर्णदिव्यमन्त्रपुष्पं समर्पयामि। (recital of the Vedic hymns as flower-offering)

7. आत्मप्रदक्षिणनमस्कारान् समर्पयामि (circumbulation and prostrations)



IV

अथ पूजासमापनम्।

(Termination of the worship ritual with incense and waving of light in front of the deity)

1. धूपमाघ्रापयामि। दीपं दर्शयामि। धूपदीपानन्तरं आचमनीयं समर्पयामि॥

2. नैवद्यम्। मध्ये मध्ये पानीयं समर्पयामि। उत्तरापोशनं समर्पयामि॥ (Food offering)

3. हस्तौ प्रक्षालयामि। पादौ प्रक्षालयामि। (washing the hands and feet) शुद्धाचमनीयं समर्पयामि। (ceremonial sipping of water)

4. ताम्बूलं समर्पयामि। (offering of tāmbūla)

5. नीराजनं समर्पयामि। (final waving of light in front of the deity) नीराजनातन्तरं आचमनीयं समर्पयामि। (final sipping of water to mark the closure of the worship ritual).

6. सुवर्णदिव्यमन्त्रपुष्पं समर्पयामि। (recital of the Vedic hymns as flower-offering)

7. आत्मप्रदक्षिणनमस्कारान् समर्पयामि (circumbulation and prostrations)





श्रीमद्धनुमदष्टादशाक्षरमन्त्रः ॥
THE MANTRA OF EIGHTEEN LETTERS

ॐ नमो भगवते आञ्जनेयाय महाबलाय स्वाहा॥

1. अस्य मन्त्रस्य ईश्वर ऋषिः। (Īśvara is the seer of the mantra)
   अनुष्टुप् छन्दः। (Anushṭup is the metrical form)
   हनुमान् देवता। (Hanumān is the deity)


   हुं बीजम्। स्वाहा शक्तिः। सर्वेष्टसिद्धये जपे विनियोगः
   (Hum is the seed of the mantra; svāhā is the power; the purpose of the mantra is to fulfil all desires)

2. ध्यानम्॥ (the contemplation on the deity)
   ॐ दहनतप्तसुवर्णसमप्रभम्
   भयहरं हृदये विहिताञ्जलिम्।
   श्रवणकुण्डलशोभिमुखाम्बुजम्
   नमत वानरराजमिहाद्भुतम्॥

3. न्यासनामानि॥ (Names of Hanumān for placement on limbs called shaḍaṅga-nyāsa)
   (i) ॐ आञ्जनेयाय नमः ॥1॥
   (ii) ॐ रुद्रमूर्तये नमः ॥2॥
   (iii) ॐ वायुपुत्राय नमः ॥3॥
   (iv) ॐ अग्निगर्भाय नमः ॥4॥
   (v) ॐ रामदूताय नमः ॥5॥
   (vi) ॐ ब्रह्मास्त्रनिवारकाय नमः ॥6॥

4. दिशानामानि (Names for the eight directions in circumambulatory order beginning with East)
   (i) ॐ रामभक्ताय नमः ॥1॥
   (ii) ॐ महातेजसे नमः ॥2॥
   (iii) ॐ कपिराजाय नमः ॥3॥
   (iv) ॐ महाबलाय नमः ॥4॥
   (v) ॐ द्रोणाद्रिहारकाय नमः ॥5॥
   (vi) ॐ मेरुपीठार्चनकारकाय नमः ॥6॥
   (vii) ॐ दक्षिणाशभास्कराय नमः ॥7॥
   (viii) ॐ सर्वविघ्ननिवारकाय नमः ॥8॥

5. परिवारनामानि॥ (Names of the eight members of the retinue of Hanumān)
   (i) ॐ सुग्रीवाय नमः ॥1॥ (Sugrīva)
   (ii) ॐ अङ्गदाय नमः ॥2॥ (Aṅgada)
   (iii) ॐ नीलाय नमः ॥3॥ (Nīla)
   (iv) ॐ जाम्बवते नमः ॥4॥ (Jāmbavān)
   (v) ॐ नलाय नमः ॥5॥ (Nala)
   (vi) ॐ सुषेणाय नमः ॥6॥ (Susheṇa)
   (vii) ॐ द्विविदाय नमः ॥7॥ (Dvivida)
   (viii) ॐ मैन्दाय नमः ॥8॥ (Mainda)



6. यन्त्रस्थापना॥ (Installation of the Yantra of Hunumān)

संविन्मय परो देव परामृतरसप्रिय।
अभीष्टं मे देहि त्वं शरणागतवत्सल॥

ॐ नमो भगवते हनुमते सर्वभूतात्मने हनूमन्ताय सर्वात्मसंयोगपद्मपीठात्मने नमः॥

7. काम्यमन्त्रप्रयोगफलानि॥ (Material Benefits of the Mantra)

i) जपित्वा क्षुद्ररोगेभ्यो मुच्यते दिवसत्रयात्॥
(Freedom from minor ailments)

ii) भूतप्रेतपिशाचादिनाशायै समाचरेत्॥
(Elimination of evil spirits)

iii) महारोगनिवृत्त्यै मुच्यते दिवसत्रयात्॥
(Freedom from major ailments)

iv) एकाशनोऽयुतं नित्यं जपन्ध्यायन्कपीश्वरम्।
राक्षसौघं विनिघ्नन्तं अचिराज्जयति द्विषान्॥
(Victory over enemies)


v) सुग्रीवेण समं रामं सन्दधानं स्मरन्कपिम्।
प्रजायायुतमेतस्य सन्धिं कुर्याद्वरुणद्वयोः॥
(Patching up differences)


vi) लङ्कां दहन्तं ध्यायन्नयुतं प्रजपेन्मनुम्।
शत्रूणां प्रदहेद् ग्रामानचिरादेव साधकः॥
(Burning up of the hamlets of enemies)

vii) प्रयाणसमये ध्यायन्हनूमन्तम्।
मनुं जपन्यो याति सोऽचिरात्।
स्वेष्टं साधयित्वा गृहं भजेत्॥
(Successful travel and safe return)

viii) यः कपीशं सदा गेहे पूजयेज्जपतत्परः।
आयुर्लक्ष्म्यौ प्रवर्धेते तस्य नश्यन्त्युपद्रवाः॥
(Longevity, wealth and elimination of obstacles)

ix) शार्दूलतस्करादिभ्यो रक्षेन्मनुरयं स्मृतः।
प्रस्वापकाले चौरेभ्यो दुष्टस्वप्नादपि ध्रुवम्॥
(Protection from wild beasts and robbers, from thiefs while asleep, and from bad dreams)





6. यन्त्रस्थापना॥ (Installation of the Yantra of Hunumān)

संविन्मय परो देव परामृतरसप्रिय।
अभीष्टं मे देहि त्वं शरणागतवत्सल॥

ॐ नमो भगवते हनुमते सर्वभूतात्मने हनूमन्ताय सर्वात्मसंयोगपद्मपीठात्मने नमः॥

7. काम्यमन्त्रप्रयोगफलानि॥ (Material Benefits of the Mantra)

i) जपित्वा क्षुद्ररोगेभ्यो मुच्यते दिवसत्रयात्॥
(Freedom from minor ailments)

ii) भूतप्रेतपिशाचादिनाशायै समाचरेत्॥
(Elimination of evil spirits)

iii) महारोगनिवृत्त्यै मुच्यते दिवसत्रयात्॥
(Freedom from major ailments)

iv) एकाशनोऽयुतं नित्यं जपन्ध्यायन्कपीश्वरम्।
राक्षसौघं विनिघ्नन्तं अचिराज्जयति द्विषान्॥
(Victory over enemies)


v) सुग्रीवेण समं रामं सन्दधानं स्मरन्कपिम्।
प्रजायायुतमेतस्य सन्धिं कुर्याद्विरुणद्वयोः॥
(Patching up differences)

vi) लङ्कां दहन्तं ध्यायन्नयुतं प्रजपेन्मनुम्।
शत्रूणां प्रदहेद् ग्रामानचिरादेव साधकः॥
(Burning up of the hamlets of enemies)

vii) प्रयाणसमये ध्यायन्हनूमन्तम्।
मनुं जपन्यो याति सोऽचिरात्।
स्वेष्टं साधयित्वा गृहं भजेत्॥
(Successful travel and safe return)

viii) यः कपीशं सदा गेहे पूजयेज्जपतत्परः।
आयुर्लक्ष्म्यौ प्रवर्धेते तस्य नश्यन्त्युपद्रवाः॥
(Longevity, wealth and elimination of obstacles)

ix) शार्दूलतस्करादिभ्यो रक्षेन्मनुरयं स्मृतः।
प्रस्वापकाले चौरेभ्यो दुष्टस्वप्नादपि ध्रुवम्॥
(Protection from wild beasts and robbers, from thiefs while asleep, and from bad dreams)



VIŚVA-LOCHANA-CHAKRA-PŪJĀ

This ritual, also known as Hanumad-shashṭyakshara-mantra-prayoga, because it involves a 60-lettered mantra of Hanumān, is extracted from *Agastya-samhitā.* The ritual was told by Agastya to Sutīkshṇa. The purpose of the ritual as given in the text is to visualize the form of the deity, but the context suggests that it is to ascertain whether the work intended or undertaken will be successful or not (kārya-siddhi).

The 60-lettered mantra is given in the beginning, along with its viniyoga. The pūjā involves the employment of a Hanumatpūjana-yantra, given here.

ॐ नमो भगवते रुद्रावताराय महाबलाय आञ्जनेयाय वायुपुत्राय कोसलेन्द्रानुचराय साम्प्रतं स्वात्मानं दर्शय सत्यं वद वद स्वाहा हां हां ॐ ॥ इति मन्त्रः॥

विनियोगः॥

ॐ अस्य श्रीविश्वलोचन चक्रराजहनुमन्महामन्त्रस्य अगस्त्यऋषिः। अतिजगतीच्छन्दः। कोसलेन्द्रानुचरो महेश्वरो हनुमान्देवता। हां बीजः। स्वाहा शक्तिः। नमः कीलकम्॥ स्वात्मदर्शने विनियोगः॥

I ऋष्यादिन्यासः॥

ॐ अगस्त्यऋषये नमः। शिरसे॥1॥
ॐ अतिजगतीच्छन्दसे नमः। मुखे॥2॥
ॐ कोमलेन्द्रानुचरो महेश्वरो हनुमान्देवतायै नमः हृदि॥3॥
ॐ हां बीजाय नमः। गृह्ये॥4॥
ॐ स्वाहा शक्तये नमः। पादयोः॥5॥
ॐ नमः कीलकाय नमः। नाभौ॥6॥
ॐ स्वात्मदर्शनविनियोगाय नमः॥ सर्वाङ्गे॥7॥

II हृदयादिषडङ्गन्यासः॥

ॐ नमो भगवते हां हनुमते। हृदयाय नमः॥1॥
ॐ रुद्रावताराय महाबलाय हीं हनुमते। शिरसे स्वाहा॥2॥
ॐ आञ्जनेयाय वायुपुत्राय हूं हनुमते। शिखायै वषट्॥3॥
ॐ कोसलेन्द्रानुचराय हैं हनुमते। कवचाय हुम्॥4॥
ॐ साम्प्रतं स्वात्मानं दर्शय दर्शय हौं हनुमते नेत्रत्रयाय वौषट्॥5॥
ॐ सत्यं वद वद स्वाहा हां हां ॐ हः हनुमते। अस्त्राय फट्॥6॥

III ध्यानम्।

मनोजवं मारुततुल्यवेगं यतेन्द्रियं बुद्धिमतां वरिष्ठम्।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं शिरसा नमामि॥

IV पीठदेवताप्रतिष्ठा।

a) The installation of the yantra on the consecrated seat in the form of 'sarvatobhadramaṇḍala', and consisting of the tattva-deities Maṇḍūka and others: 'Om mam maṇḍūkādi paratattva-pīṭha devatābhyo namah'. Then the nine pīṭhaśaktis are worshipped in the circumambulatory order, commencing from the East.

ॐ विमलायै नमः।
ॐ ज्ञानायै नमः।
ॐ क्रियायै नमः।
ॐ योगायै नमः।
ॐ प्रह्वायै नमः।
ॐ सत्यायै नमः।
ॐ ईशानायै नमः।
मध्ये। ॐ अनुग्रहायै नमः॥

b) An icon of Hanuman made in metal is installed on a copper plate and bathed with oil, milk and water; it is cleaned dry and placed on a seat made of flowers:

ॐ नमो भगवते रुद्राय सर्वभूतात्मने हनुमन्ताय सर्वात्मसंयोग पद्मपीठात्मने नमः॥

Then the icon is infused with life (prāṇa-pratishṭhā), and initially worshipped with upachāras. Then permission is sought with folded hands (with flowers held in the hands) for āvaraṇa-pūjā, (for the retinue divinities in the enclosures)

ॐ सविन्मय परो देव परामृतरसप्रिय अनुज्ञां हनुमन् देहि परिवारार्चनाय मे॥ Flowers are offered (Pushpāñjali)

V **आवरणपूजा॥ (Worship in the yantra)**

i) Inside the triangle (trikoṇa-madhya)

1. (मध्ये) ॐ रां रामायै नमः। रामश्रीपादुकां पूजयामि तर्पयामि नमः॥1॥

2. (पूर्वे) ॐ हां हनुमते नमः। हनुमच्छ्रीपादुकां पूजयामि तर्पयामि नमः॥2॥

3. (ईशान्ये) ॐ सं सुग्रीवाय नमः। सुग्रीवश्रीपादुकां पूजयामि तर्पयामि नमः॥3॥

4. (अग्नेय्ये) ॐ लं लक्ष्मणाय नमः। लक्ष्मणश्रीपादुकां पूजयामि तर्पयामि नमः॥4॥
(flower-offerings)
ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम्॥

ii) Worship of the eight siddhis (attainments) in the eight-petalled enclosure around the triangle

5. ॐ अणिमायै नमः। अणिमाश्रीपादुकां पूजयामि तर्पयामि नमः॥1॥
6. ॐ महिमायै नमः। महिमाश्रीपादुकां पूजयामि तर्पयामि नमः॥2॥
7. ॐ गरिमायै नमः। गरिमाश्रीपादुकां पूजयामि तर्पयामि नमः॥3॥
8. ॐ लघिमायै नमः। लघिमाश्रीपादुकां पूजयामि तर्पयामि नमः॥4॥
9. ॐ प्राप्त्यै नमः। प्राप्तिश्रीपादुकां पूजयामि तर्पयामि नमः॥5॥
10. ॐ प्राकाम्यायै नमः। प्राकाम्यश्रीपादुकां पूजयामि तर्पयामि नमः॥6॥
11. ॐ ईशितायै नमः। ईशिताश्रीपादुकां पूजयामि तर्पयामि नमः॥7॥
12. ॐ वशितायै नमः। वशिताश्रीपादुकां पूजयामि तर्पयामि नमः॥8॥ (ऋथुशि षिषशीळसी)
ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम्॥

iii) Worship of the sixteen attendant-divinities of Hanumān in the sixteeen petals (in the circumambulatory order), outside the eight-petalled enclosure.

13. ॐ विजयध्वजाय नमः॥1॥
14. ॐ सिंहध्वजाय नमः॥2॥
15. ॐ हलध्वजाय नमः॥3॥
16. ॐ सुषेणाय नमः॥4॥
17. ॐ भद्रसेनाय नमः॥5॥
18. ॐ जयसेनाय नमः॥6॥
19. ॐ विजयसेनाय नमः॥7॥
20. ॐ गोमुखाय नमः॥8॥
21. ॐ दधिमुखाय नमः॥9॥
22. ॐ जडलाङ्गूलाय नमः॥10॥
23. ॐ महीलाङ्गूलाय नमः॥11॥
24. ॐ कालाय नमः ॥12॥
25. ॐ महाकालाय नमः॥13॥
26. ॐ वज्रसाराय नमः॥14॥
27. ॐ महासारय नमः॥15॥
28. ॐ मकरध्वजाय नमः॥16॥

(Flower-offerings)
ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सल। भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम्॥

६	१	८
७	५	३
२	९	४

iv) Worship of the mātṛkas from अ to क्ष in the circle outside the previous enclosure; the letters as bījāksharas are inscribed in the circumambulatory order.

v) In the all-enclosing square with openings on the four sides, the

guardians of the ten directions (Indra and others) are worshipped (29-38), as also the weapons (vajra and others) (39-48)

This completes the āvaraṇa-pūjā (Flower-offerings)

vi) a) Then incense and other offerings are made. Prayers and eulogies are recited. Then the devotee begins japa with dhyāna.

(इत्यावरणपूजां कृत्वा धूपादिना संपूज्य स्तोत्रादिना हनूमन्तं स्तुत्वा। मालां संस्कृतामादाय हृदये धारयन् मौनी एकाग्रचित्तः भूत्वा मूलमन्त्रं जपति॥)

b) The perfect accomplishment of the japa is secured by repeating the mantra one lakh times, and by other sequences (homa, tarpaṇa etc.)

अस्य मन्त्रस्य पुरश्चरणमेकलक्षजपः।
बदलघृतैः दशांशतो होमः।
तद्दशांशेन त्रिमुधुभिः (मधुघृतशर्करैः) तर्पणम्।
तद्दशांशेन गन्धवारिभिः मार्जनम्।
तद्दशांशेन मोदकैः पायसेन वा ब्राह्मण
भोजनम्।
इति मन्त्रसिद्धिः॥

c) Then lamp is lighted for Hanumān (dīpa-dāna) on Fridays, Saturdays and Tuesdays in a plate filled with clarified butter, the wick made fragrant.

शुक्र-शनि-भौमवासरे

घृतदीपं स्वर्णादिपात्रे सुगन्धवर्त्या संयोज्य-
ॐ हनुमद्दीपाय नमः॥
इति दीपं संपूज्य प्रज्वाल्य कज्जलं पाययेत्।
ॐ हनुद्धञ्जनाय नमः॥

On a large platter a circle, two aṅgulas in diameter, is drawn with lac, and over that another circle, four angulas wide, is drawn. Lac mixed with fragrant oil is filled in the first circle and over it Kumkum is smeared. The mūla-mantra is then inscribed over it and worship is offered.

इति कज्जलं संपूज्य ततः विशाले शोभने पात्रे द्वयंगुलं वर्तुलं पदुपरि चतुरङ्गुलं चक्रवालमलक्षकेन वा विधाय, तत्राद्यमण्डले सुगन्धेन स्नेहेन कज्जलं संयोज्य तदुपरि मण्डलं कुंकुमेन संलिप्य भूर्जपत्रे मूलमन्त्रं लिखित्वा। मन्त्रान्तरे च पत्रान्तरयोः स्वाननिरूपक तगरादीन् अगरु कुंकुम कर्पूरकल्केन निरूपयेत्। तदग्रे यन्त्रं लिखित्वा तेषां मूलमन्त्रेण षोडशोपचारैः सम्पूजयेत्॥

ॐ जयत्यति रामो लक्ष्मणश्च महाबलः।
राजा जयति सुग्रीवो हनुमान्कार्यसाधकः॥

इति वा मन्त्रेण सम्पूजनम्॥

A boy who is pure in conduct and a celibate, and who has had his bath, is brought, and seated near the lamp. The devotee recites the mūla-mantra 108 times. The boy is then made to get up, touch the lamp and look intently into the light.

ततः, स्नातं शुद्धं अखण्डितब्रह्मचर्यं अदूषितं वटुं अनीय तत्र संस्थाप्य तस्य मन्त्रं श्रावयेत् पूजां च कारयेत्। ततः गोघृतेन तैलेन वा दीपं प्रज्याल्य शुचिः प्रयतः साधकः मौनेन अष्टोत्तरशतवारं मूलमन्त्रं जपेत्।

ततो वटुः समुत्थाप्य दीपकेन स्पृष्टं कृत्वा मेचकमण्डले नेत्रं दत्त्वा दीपं पश्येत्। तत्र मन्त्रत्रयं जपेत्। हुं इति उच्चरन् वटुं पृच्छत्-'किं पश्यसि?' इति एवं पुनः पुनः पृच्छेत्॥

वटुः पूर्वं तेजोमण्डलं पश्यति। तत उत्तरं तत उपवेशनम्। ततः प्रभाम्। ततः समयदेवताः। ततः सिंहासनम्। अनन्तरं अनुक्रमं हनूमन्तं, सुग्रीवं, लक्ष्मणं, श्रीरामं च पश्यति। ततः स्वचिन्तितं कार्यं यजमानः वटवे श्रावयेत्। वटुः कृताञ्जलिर्भूत्वा 'भगवन् हनुमन् मया निवेदितं कार्यं कृपया वदतु भवान्।' इति ब्रूयात्।

तद्भाषितं शृत्वा यजमानः गुरवे निवेदयेत्। तेन सिद्ध्यसिद्धि जानीयात्॥

The devotee while reciting Hum will ask the boy "what do you see?" Forms are expected to appear in the light of the lamp. First, the boy sees an aura of light, then the seat, then lustre; in the lustre he sees a throne, then Hanumān, Sugrīva, Lakshmaṇa and Rāma, in that order. Then the devotee will tell the boy the specific work that he has in his mind. The boy will then join his palms and asks Hanumān to tell him whether the work that is intended will come to pass. The answer that the boy gets will be interpreted to mean success or failure.

यदा तु वटुः किमपि न पश्यति, अन्यथा वा पश्यति गिरि समुद्र-नाग-यक्ष-रक्षस-नर-नारी-पशु-पक्षिगणं पश्यति, तदपि तदा शुभाशुभं तद्रूपेण जानीयात्। यद्यनिष्टं पश्यति तदा यन्त्रं वटुशिरसि निधाय मन्त्रं जप्त्वा पुनः 'किं पश्यसी' ति तं पृच्छेत्। ततः इष्टं पश्यति। अनन्तरं कार्यं पृच्छेत्। चोर-जार-नारी-द्यूतादीनां प्रश्नं न कुर्यात्॥


Even when, the boy sees nothing or sees different things like mountains, oceans, serpents, demons, human beings, birds or animals, the suggestions for success or failure must be read in them. If, however, an undesirable forecast is made, the yantra must be placed on

the boy's head, the mantra must be recited, and then the boy must be asked what he now sees. He will then see only signs of success. However, questions pertaining to thiefs, paramours, women, gambling and so on must never be asked.

शान्त्यर्थं श्वेतवस्त्रमाल्यनैवेद्योपचारैः
तुष्टिं कुर्यात्।
इतरे रक्तवस्त्राणि धारयेयुः। कार्यसिद्धिर्भवति।
प्रश्नवेला अर्धरात्रिरेव॥

For pacification purposes, white cloth must be worn by the devotee who is engaged in the rite, and garlands of white flowers. Others may wear red garments. Food-offerings must be made. The only time suitable for this ritual is mid-night.

इत्यगस्त्यसंहितायां
विश्वलोचनचक्रपूजाविधानं समाप्तम्॥



YANTRODDHĀRAKA-HANUMĀN

Śrī-Vyāsa-tīrtha (1499-1539), who was the preceptor to the Vijayanagar kings, was the pontiff of one of the monastic centres founded by Śrī Madhvāchārya, who was regarded as an incarnation of Hanumān. He got carved and installed as many as 732 stone-icons of Hanumān in the domains of the then Vijayanagar empire. The first of these was in the very birth-spot of Hanumān, chakra-tīrtha in Hampi on the banks of the river Tuṅgā. This is on a huge boulder, now enclosed in a temple to Rāma.

It is said that Śrī-Vyāsa-tīrtha who was residing in Hampi got a vision while in meditation and tried to draw it on the rock before which he sitting. He sketched Hanumān seated in dhyāna in padmāsana. Then he closed his eyes and was absorbed in meditation. When he opened his eyes, he could not see what he had sketched on the rock; it had disappeared. He saw a monkey sitting on the rock jump and run away. He sketched Hanumān's figure again, and sat in meditation, closing his eyes. When he opened his eyes, the figure had again disappeared, another monkey ran away.

This happened twelve times. At last, he inscribed on the rock a yantra, and sketched the figure of Hunumān in dhyāna in the centre of the yantra. Now, the yantra preserved the figure of Hunumān; and around the yantra were twelve monkeys forming a circle. They were the monkeys that had earlier jumped away from the saint's sketches of Hanumān.

Śrī Vyāsa-tīrtha now inscribed three crore mystic seed-syllables (bījāksharas) within the yantra, and made it powerful. This vision of Hanumān which Śrī Vyāsa-tīrtha had, and preserved for posterity by recording it on the rock, came to be known as Yantroddhāraka-mukhya-prāṇa, because of the yantra which protected the figure of Hanumān.

Hanumān here is seated in the typical yogic posture, and is encircled by his own tail (vṛtta, maṇḍala). The two-armed Hanumān holds his right hand near his heart in the act of japa-dhyāna. The left hand rests on the crossed legs. There are no weapons like mace, tree or rocks. He is in deep meditation.

The figure is enclosed in a six-cornered design (shaṭ-koṇa-yantra), which is formed by two triangles interlocked; making also six small triangles. And this is surrounded by a circle, which is a lotus with fifty one petals (representing the seed-syllables of the Sanskrit alphabet). Going round the entire mystic design are the twelve monkeys (representing dvādaśa-mūrtis), forming a chain.

The symbolism of the yantra is in keeping with both Yoga and Vedanta. The outer circle represents the space of transactional experience (saṃsāra-chakra). The six-cornered figure (shaṭkoṇa) signifies the individual soul (jīva), that is poised within the sphere of samsāra. Hanumān's tail which forms a circle within the shaṭkoṇa is the heart space (daharākāśa). The figure of Hanuman itself symbolizes the chief vital principle (mukhya-prāṇa) in the individual constitution. Hanumān is shown pointing to his heart, signifying his own antaryāmin (inner controller), viz. Vishṇu.

Hanumān engagd in japa is associated with the classical 'paropāsanā' (also known as ajapā-japa-gāyatri). The chief vital principle is marked primarily by breathing; breathing-in (represented by the syllable 'sa') and breathing-out (represented by 'ha'):

हकारेण बहिर्याति सकारेण विशेत्पुनः।
हंसात्मिकां भगवतीं जीवो जपति सर्वदा॥

The individual soul is continuously engaged in the japa of 'hamsa' (ha-sa), breathing in and breathing out. In the span of twenty-four hours, there are 21,600 breaths in the ascent (aroha-krama, from

mūlādhāra to sahasrāra) and an equal number of breaths in the descent (avaroha-krama, from sahasrāra to mūlādhāra). In the ascent, the mantra assumes the form 'hamsa' while in the descent it is 'soham'. This japa 'hamsas soham' goes on, but is unarticulated; hence it is 'ajapājapa'). The expression 'hamsa' is synonymous with the individual soul (jīva). Hanumān as Mukhya-prāṇa sits at the feet of Vishṇu who is in the heart-lotus of every creature, and makes the individual soul (who is seated at his own feet) perform this japa incessantly.

Śrī Vyāsa-tīrtha has provided a visual representation of this idea in the Yantroddhāraka-mukhya-prāṇa design. There is also a brief hymn with eight verses which is connected with this form of Hanumān. It is commonly ascribed to Śrī-Vyāsa-tīrtha himself, but it appears to be a much later piece of composition. And it does not directly refer to the involvements of the design or to the idea contained in it. The only relevant detail is the location of the yantra in Hampi (in verse 3) along with the information that Śrī-Vyāsa-tīrtha worshipped it. The stotra-proper is over in the fifth verse, the other verses being in the nature of Phala-stuti of the usual kind.

नमामि दूतं रामस्य सुखदं च सुरद्रुमम्।
पीनवृत्तमहाबाहुं सर्वशत्रुनिबर्हणम्॥1॥

नानारत्नसमायुक्तकुण्डलादिविभूषितम्।
सर्वदाऽभीष्टदातारं सतां वै दृढमाहवे॥2॥

वासिनं चक्रतीर्थस्य दक्षिणस्थगिरौ सदा।
तुङ्गाम्बोधितरङ्गस्य वातेन परिशोभिते ॥3॥

नानादेशगतैः सद्भिः सैव्यमानं नृपोत्तमैः।
धूपदीपादिनैवेद्यैः पञ्चखाद्यैश्च शक्तितः॥4॥

भजामि श्रीहनूमन्तं हेमकान्तिसमप्रभम्।
व्यासतीर्थयतीन्द्रेण पूजितं प्रणिधानतः॥5॥

त्रिवारं यः पठेन्नित्यं स्तोत्रं भक्त्या द्विजोत्तमः।
वांछितः लभतेऽभीष्टं षण्मासाभ्यन्तरे खलु॥6॥

पुत्रार्थी लभते पुत्रं यशोऽर्थी लभते यशः।
विद्यार्थी लभते विद्यां धनार्थी लभते धनम्॥7॥

सर्वथा माऽस्तु सन्देहो हरिः साक्षी जगत्पतिः।
यः करोत्यत्र सन्देहं स याति निरयं ध्रुवम्॥8॥

SAHASRANĀMA-STOTRA OF HANUMĀN
(in Rudra-yāmala)

कैलासशिखरे रम्ये देवदेवं महेश्वरम् ।
ध्यानोपरतमासीनं नन्दिशृंगिगणैर्वृतम् ॥ १ ॥

ध्यानान्ते च प्रसन्नास्यमेकान्ते समुपस्थितम् ।
दृष्ट्वा शंभु तदा देवी पप्रच्छ कमलानना ॥ २ ॥

देव्युवाच ।
शृणु देव प्रवक्ष्यामि संशयोऽस्ति महान्मम ।
रुद्रैकादशमाख्यातं पुराहं न च वेद्मि तम् ॥ ३ ॥

कथयस्व महाप्राज्ञ सर्वतो निर्णयं शुभम् ।
समाराधयतो लोके भुक्तिमुक्तिफलं भवेत् ॥ ४ ॥

मंत्रं यंत्रं तथा निर्णयं च विधिपूजनम् ।
तत्सर्वं ब्रूहि में नाथ कृतार्था च भवाम्यहम् ॥ ५ ॥

ईश्वर उवाच-
शृणु देवि प्रवक्ष्यामि गोप्यं सर्वागमे सदा ।
सर्वस्वं मम लोकानां नृणां स्वर्गापवर्गदम् ॥ ६ ॥

दशविष्णुर्द्वादशार्कास्ते चैकादश संस्मृतां ।
रुद्रःपरमचण्डश्च लोकेऽस्मिन्भुक्तिमुक्तिदः ॥ ७ ॥

हनुमान्स महादेवः कालकालः सदाशिवः ।
भुक्तिकैवल्यमुक्तिदः सर्वकामदः ॥ ८ ॥

चिद्रूपी च जगद्रूपस्तथारूपविराड्भूत् ।
रावणस्य वधार्थाय रामस्य च हिताय च ॥ ९ ॥

अंजनीगर्भसम्भूतो वायुरूपी सनातनः ।
यस्य स्मरणमात्रेण सर्वविघ्नं विनश्यति ॥ १० ॥

मंत्रं तस्य प्रवक्ष्यामि कामदं सुरदुर्लभम् ।
नित्यं परतरं लोके देवदैत्येषु दुर्लभम् ॥ ११ ॥

प्रणवं पर्वमुद्‌धृत्य कामराजं ततो वदेत् ।
ॐ नमो भगवते हनुमतेऽपि ततो वदेत् ॥ १२ ॥

ततो वैश्वानरो मायामंत्रराज मिमं प्रिये ।
एवं बहुतरा मंत्राः सर्वशास्त्रेषु गोपिताः ॥ १३ ॥

येन विज्ञानमात्रेण त्रैलोक्यंवशमानयेत् ।
वह्निं शीतंकरोत्येव वातं च स्थिरता नयेत् ॥ १४ ॥

विघ्नं च नाशयत्याशु दासवत्स्याज्जगत्रयम् ।
ध्यानं तस्य प्रवक्ष्यामि हनुर्येन प्रसीदति ॥ १५ ॥

प्रदीप्तं स्वर्णवर्णाभं बालार्कारुणलोचनम् ।
स्वर्णमेरुविशालांगं शतसूर्यसमप्रभम् ॥ १६ ॥

रक्तांम्बरं धरासीनं सुग्रीवादियुतं तथा ।
गोष्पदीकृतवारीशं मशकीकृतराक्षसम् ॥ १७ ॥

पुच्छवन्तं कपीशं तं महारुद्रं भयंकरम् ।
ज्ञानमुद्रालसद्बाहुं सर्वालंकारभूषितम् ॥ १८ ॥

ध्यानस्य धारणादेव विघ्नान्मुक्तः सदा नरः ।
त्रिषु लोकेषु विख्यातः सर्वत्र विजयी भवेत ॥ १९ ॥

नाम्नां तस्य सहस्रं तु कथयिष्यामि ते शृणु ।
यस्य स्मरणमात्रेण वादी मूको भवेद्‌ध्रुवम् ॥ २० ॥

स्तम्भनं परसैन्यानां मारणाय च वैरिणाम् ।
दारयेच्छाकिनीः शीघ्रं डाकिनी-भूतप्रेतकान् ॥ २१ ॥

हरणं रोगशत्रूणां कारणं सर्वकर्मणाम् ।
तारणं सर्वविघ्ननां मोहनं सर्वयोषिताम् ॥ २२ ॥

धारणं सर्वयोगानां वारणं शीघ्रमापदाम् ॥ २३ ॥

ॐ अस्य श्रीहनुमतः सहस्रनामस्तोत्रमंत्रस्य सदाशिव ऋषिः ।
अनुष्टुप् छंदः । श्रीहनुमान् देवता ।
ॐ क्लीं इति बीजम् । नम इति कीलकम् । स्वाहेति शक्तिः ।
समस्तपुरुषार्थसिद्‌ध्यर्थे जपे विनियोगः । ओमोंकारनमोरूपमों नमोरूपपालकः ।
ॐकारमयोंकारकृदोंकारात्मा सनातनः ॥ २४ ॥

ब्रह्मब्रह्ममयो ब्रह्मज्ञानी ब्रह्म ब्रह्मस्वरूप वित् ।
कपीशः कपिनाथश्च कपिनाथः सपालकः ॥ २५ ॥

कपिनाथप्रियः कालः कपिनाथस्य घातकः ।
कपिनाथः शोकहर्त्ता कपिभर्त्ता कपीश्वरः ॥ २६ ॥

कपिजीवनदाता च कपिमूर्तिः कपिर्भृतः ।
कालात्मा कालरूपी च कालकालस्तु कालभुक् ॥ २७ ॥

कालज्ञानी कालकर्त्ता कलहानिः कालनिधिः ।
कलानिधिप्रियः कर्त्ता कलानिधिसमप्रभः ॥ २८ ॥

कलापी कलपाता च कीशत्राता किशां पतिः ।
कमलापतिप्रियः काकस्वरघ्नः कुलपालकः ॥ २९ ॥

कुलभर्त्ता कुलत्राता कुलचारपरायणः ।
काश्यपाह्लादकः काकध्वंसी कर्मकृतां पतिः ॥ ३० ॥

कृष्णः कृष्णस्तुति कृष्णकृष्णरूपो महात्मवान् ।
कृष्णवेत्ता कृष्णभर्त्ता कपीशः क्रोधवान् कपिः ॥ ३१ ॥

कालरात्रिः कुबेरश्च कुबेरवनपालकः ।
कुबेरधनदाता च कौसल्यानन्दजीवनः ॥ ३२ ॥

कौसलेशप्रियः केतुः कपाली कामपालकः ।
कारुण्यः करुणारूप करुणानिधिविग्रहः ॥ ३३ ॥

कारुण्यकर्ता दाता च कपिः साध्यः कृतान्तकः ।
कूर्मः कूर्मपतिः कूर्मभर्त्ता कूर्मस्य प्रेमवान् ॥ ३४ ॥

कुक्कुटः कुक्कुटाह्वानः कुञ्जरः कमलाननः ।
कुञ्जरकलभः केकिनादजित्कल्पजीवनः ॥ ३५ ॥

कल्पाभवासी कल्पान्तदाता कल्पविबोधकः ।
कलभः कलहस्तश्च कम्पः कम्पतिस्तथा ॥ ३६ ॥

कर्मफलप्रदः कर्मा कमनीयः कलापवान् ।
कमलासनबंधश्च कम्पः कमलासनपूजकः ॥ ३७ ॥

कमलासनसेवी च कमलासनमानितः ।
कमलासनप्रियः कंबु कंबुकंठोऽपि कामधुक् ॥ ३८ ॥

किञ्जल्करूपी किञ्जल्कः किञ्जल्कावनिवासकः ।
खगनाथप्रियः खंगी खगताथप्रहारकः ॥ ३६ ॥

खगनाथसुपूज्यश्च खगनाथप्रबोधकः ।
खगनाथसुपूज्यश्च खरध्वंसी खरान्तकः ॥ ४० ॥

खरारिप्रियबन्धुश्च खरारिजीवनः सदा ।
खंगहस्तः खंगधनः खंगहानी च खंगपः ॥ ४१ ॥

खंजरीटप्रियः खंजः खंजत्राता खमूर्तिवान् ।
खंचरः खेचरत्राता खेचरात्मा खरारिजित् ॥ ४२ ॥

खंजरीटपतिः पूज्यः खंजरीटेव चंचलः ।
खद्योतबन्धुः खद्योतः खद्योतनप्रियः सदा ॥ ४३ ॥

गरुत्मान् गरुडो गोप्यो गरुत्मद्दर्पहारकः ।
गर्विष्टा गर्वहर्ता च गर्वहा गर्वनाशकः ॥ ४४ ॥

गर्वो गुणप्रियो गाणो गुणसेवी गुणान्वितः ।
गुणत्राता गुणरतो गुणवन्तप्रियो गुणी ॥ ४५ ॥

गणेशो गणपाता च गणरूपो गणप्रियः ।
गंभीरोऽथ गुणाकारो गरिमा गरिमप्रदः ॥ ४६ ॥

गणरक्षोगणक्षरो गणदो गणसेवितः ।
गवांशो गवयत्राता गर्जितः सगणाधिपः ॥ ४७ ॥

गन्धमादनहर्ता च गन्धमादनपूजकः ।
गन्धमादनसेवी च गन्धमादनरूपधृक् ॥ ४८ ॥

गुरुर्गुरुप्रियो गौरो गुरु सेव्यो गुरून्नतः ।
गुरुगीतापरो गीतागीतविद्यागुरुर्गुरुः ॥ ४६ ॥

गीताप्रियो गीतारतो गीतज्ञो गीतवानपि ।
गायत्र्या जापको गोष्ठो गोष्ठदेवोऽथ गोष्ठपः ॥ ५० ॥

गोष्पदीकृतवारीशो गोविंदो गोपबंधकः ।
गौवर्धनधरो गर्वो गोवर्धनप्रपूजकः ॥ ५१ ॥

गौष्पदीकृतवारीशो गोविंदो गोपबंधकः ।
गौवर्धन धरो गर्वो गोवर्धनप्रपूजकः ॥ ५२ ॥





गंधर्वो गंधर्वरतो गंधर्वानन्दनन्दितः ।
गंधो गदाधरो गुप्तो गदाया गुह्यदेश्वरः ॥ ५३ ॥

गिरिजापूजको गीश्च गीर्वाणो गोष्पतिस्तथा ।
गिरिर्गिरिप्रियो गर्वो गर्भपो गर्भवासकः ॥ ५४ ॥

गभस्तिग्रासको ग्रासो ग्रासदाता ग्रहेश्वरः ।
ग्रहो ग्रहेशनो ग्राहो ग्रहदोषविनाशनः ॥ ५५ ॥

ग्रहारूढो ग्रहपतिग्रर्हणो ग्रहणाधिपः ।
गोली गब्यो गवेश्पश्च गवाक्षो मोक्षदायकः ॥ ५६ ॥

गणो गम्यो गणदाता गरुडध्वजवल्लभः ।
गेहो गेहप्रदो गम्यो गीतागानपरायणः ॥ ५७ ॥

गह्वरो गह्वरत्राणो गर्गो गर्गोश्वयप्रदः ।
गर्गप्रियो गर्गरतो गौतमो गौतमप्रदः ॥ ५८ ॥

गंगास्नायी गयानाथो गयापिण्डप्रदायकः ।
गौतमीतीर्थचारी च गौतमीतीर्थपूजकः ॥ ५९ ॥

गणेन्द्रो गणत्राता ग्रन्थदो ग्रन्थकारकः ।
घनाङ् धो घातको घोरो घोररूपी घनप्रदः ॥ ६० ॥

घोरदंष्ट्रो घोरनखो घोरघाती घनेतरः ।
घोरराक्षसघाती च़ घोररूप्यघदर्पहा ॥ ६१ ॥

घर्मो धर्मप्रदश्चैव घर्मरूपी घनाघनः ।
घनध्वनिरतो घण्टावाद्यप्रियघृणाकरः ॥ ६२ ॥

घोघोघनस्वनो घूर्णो घूर्णितोऽपि घनालयः ।
ङकारो ङप्रदङन्तश्चन्द्रिकामोदमोदकः ॥ ६३ ॥

चन्द्ररूपश्चन्द्रवन्द्यश्चन्द्रात्मा चन्द्रपूजकः ।
चन्द्रप्रेमश्चन्द्रबिम्बाश्च मरप्रियचञ्चलः ॥ ६४ ॥

चन्द्रवक्रश्चकोराक्षश्चन्द्र नेत्रश्चतुर्भुजः ।
चंचलात्मा चरश्चमी चलत्खञ्जनलोचनः ॥ ६५ ॥

चिद्रूपश्चिन्नापानश्च चलच्चित्तचितार्चितः ।
चिदानन्दश्चितश्चैत्रश्चवंशवस्य पालकः ॥ ६६ ॥

छत्रश्छत्रप्रदश्छत्री छत्ररूपी छिदांछदः ।
छलहा छलदश्छित्रश्छिन्नघाती क्षपाकरः ॥ ६७ ॥

छद्मरूपी छद्महारी छती छलतरुस्तथा ।
छायाकर द्युचिश्छन्बश्छंदविद्याविनोदकः ॥ ६८ ॥

छिन्नारातिश्छिन्नपापश्छन्दवारणवाहकः ।
छन्दश्छत्रहनश्छिप्रश्छवनश्छन्मश्छमी ॥ ६९ ॥

क्षमागारः क्षमाबन्दः क्षपापतिप्रपूजकः ।
छलघातीं छिद्रहारी छिद्रान्वेषणपालकः ॥ ७०॥

जनो जनार्दनो जेतोजितारिर्जितसंगरः ।
जितमृत्युर्जरातीतो जनार्दनप्रियो जयः ॥ ७१ ॥

जयदो जयकर्ता च जयपाता जयप्रियः ।
जितेन्द्रियो जितारातिर्जितेन्द्रियप्रियो जयी ॥ ७२ ॥

जगदानन्ददाता च जगदान्दकारकः ।
जगद्वंद्यो जगज्जीवो जगतामुपकारकः ॥ ७३ ॥

जगद्धाता जगद्धारी जगद्बीजो जगत्पिता ।
जगत्पतिप्रियो जिष्णुर्जिष्णुज्जिष्णुरक्षकः ॥ ७४ ॥

जिष्णुवन्द्यो जिष्णुपूज्यो जिष्णुमूर्तिविभूषितः ।
जिष्णुप्रियो जिष्णुरतो जिष्णुलोकाभिवासकः ॥ ७५ ॥

जयो जयप्रदो जायो जायको जयजाड्यहा ।
जयप्रियो जनानन्दो जनदो जनजीवनः ॥ ७६ ॥

जयानंदो जपापुष्पवल्लभो जयपूजकः ।
जाड्यहर्ता जाड्यदाता जाड्यकर्ता जडप्रियः ॥ ७७ ॥

जगन्नेता जगन्नाथो जगदीशो जनेश्वर ।
जगन्मंगलधो जीवो जगत्यवानपावनः ॥ ७८ ॥

जगत्राणो जगत्प्राणो जानकीपतिवत्सलः
जानकीपतिपूज्यश्च जानकीपतिसेवकः ॥ ७९ ॥

जानकीशोकहारी च जानकी दुःखबञ्जनः ।
यजुर्वेदो यजुर्वक्ता यजुःपाठप्रियो व्रती ॥ ८० ॥

जिष्णुर्जिष्णुकरतो जिष्णुधाता जिष्णुविनाशनः ।
जिष्णुहा जिष्णुपाता तु जिष्णुराक्षसघातकः ॥ ८१ ॥

जतीनामग्रगण्यश्चं जतीनां वरदायकः ।
झुँझुरो झूर्झुरो झूर्झनवरो झँझावातनिषेवितः ॥ ८२ ॥

झिल्लीरव स्वतो ञन्तो ञवर्णोऽञनतोञदः ।
टकारादिष्टकरान्तष्टवर्णाष्टप्रपूजकः ॥ ८३ ॥

टिट्टिभष्टिट्टिभस्तष्टिट्टिभप्रियवत्सलः ।
ठकारवर्णनिलयष्ठकारर्णववासितः ॥ ८४ ॥

ठकारवीरनितष्ठकारप्रियदर्शकः ।
डाकिनिरतो डंको डंकिनीप्राणहारकः ॥ ८५ ॥

डाकिनीवरदाता च डाकिनीभयनाशनः ।
डिण्डिमध्वनिकर्ता च डिम्भो डिम्भातरेतरः ॥ ८६ ॥

डक्काढक्कानवो ढक्कावाद्यढक्कामहोत्सवः ।
णंत्यो णान्तो णवर्णश्च णसेव्यो णप्रपूजकः ॥ ८७ ॥

तंत्री तंत्रप्रियस्तल्पस्तंत्रजित्तंत्राहकः ।
तंत्रपूज्य तंत्रातस्तंत्रविद्याविशारदः ॥ ८८ ॥

तंत्रतंत्र जयी तंत्रधारकस्तंत्रवाहकः ।
तंत्रवेत्ता तंत्रकर्ता तंत्रयंत्रवरप्रदः ॥ ८९ ॥

तंत्रदस्तंत्रदाता च तंत्रपस्तंत्रदायकः ।
तत्वदाता च तत्वज्ञस्तत्त्वस्तत्त्वप्रकाशकः ॥ ९० ॥

तंद्रा च तपनस्तल्पतलातलनिवासकः ।
तपस्तपप्रियस्तापत्रयस्तापी तपः पतिः ॥ ९१ ॥

तपस्वी च तपोज्ञाता तपत्यामुपकारकः ।
तपास्तपोत्रपस्तापी तापदस्तापहारकः ॥ ९२ ॥

तपः सिद्धिस्तपोऋद्धिस्तपोनिधिस्तपः प्रभुः ।
तीर्थस्तीर्थरतस्तीव्रतस्तीर्थवासी तु तीर्थदः ॥ ९३ ॥

तीर्थपस्तीर्थकृत्तीर्थस्वामी तीर्थविरोधकः ।
तीर्थसेवी तीर्थपतिस्तीर्थव्रतपरायणः ॥ ९४ ॥

त्रिदोषहा त्रिनेत्रश्च त्रिनेत्रप्रियहालकः ।
त्रिनेत्रप्रियदासश्च त्रिनेत्रप्रियपूजकः ॥ ९५ ॥

त्रिविक्रमस्त्रिपादूर्ध्वस्तरणिस्तारणिस्तमः ।
तमोरूपी तमोध्वंसी तमस्तमघातकः ॥ ९६ ॥

तमोधृक्तामसस्तामस्तारणिस्तमः तमोऽन्तकः ।
तमोहृत्तमकृत्ताम्रस्ताम्रौषधिगुणप्रदः ॥ ९७ ॥

तैजसस्तेजसां मूर्तिस्तेजसः प्रतिपालकः ।
तरुणस्तर्कविद्या च तर्कशास्त्रविशारदः ॥ ९८ ॥

तिमिगिलस्तत्त्वकर्ता तत्त्वदाता च तत्त्ववित् ।
तत्त्वदर्शी तत्त्वगामी तत्त्वभुक्तत्त्ववाहनः ॥ ९९ ॥

त्रिदिवस्त्रिदिवेशश्च त्रिकालश्च तमिस्रहा ।
स्थाणुः स्थाणुः स्थाणुप्रियस्थाणुः सर्वतोऽपि च वासकः ॥ १०० ॥

दयासिन्धुर्दयारूपो दयानिधिर्दयापरः ।
दयामूर्तिर्दयादाता दयादानपरायणः ॥ १०१ ॥

देवेशो देवेंद्रो देवो देवराजाधिपालकः ।
दीनबन्धु र्दीनदाता दीनोद्धरणदिव्यधृक् ॥ १०२ ॥

दिव्यदेहो दिव्यरूपो दिव्यासननिवासकः ।
दीर्घकेशो दीर्घपुच्छो दीर्घसूत्रोऽपि दीर्घभुक् ॥ १०३ ॥

दीर्घदर्शी दूरदर्शी दीर्घबाहुस्तु दीर्घपः ।
दानवारिर्दरिद्रारिर्दैत्यारिर्दस्युभञ्जनः ॥ १०४ ॥

दंष्ट्री दिंडिदण्डधरो दण्डपो दण्डप्रदायकः ।
दामोदरप्रियो दत्तात्रेयपूजनतत्परः ॥ १०५ ॥

दर्वीदलपीतर्द्रद्रुदरोगविनाशकः ।
धर्मो धर्मी धर्मशास्त्र परायणः ॥ १०६ ॥

धर्मात्मा धर्मनेता च धर्मधृग्धर्मधारकः ।
धर्मध्वजो धर्ममूर्तिर्धर्मराजस्य त्रासकः ॥ १०७ ॥

धाता ध्येयो धनो धन्यो धनदो धनपो धनी ।
धनदत्राणकर्ता च धनपप्रतिपालकः ॥ १०८ ॥

धरणीधरप्रियो धन्वी धनुष्मान् धनधारकः ।
धन्वीशवत्सलो धीरो दाता मोदप्रदायकः ॥ १०९ ॥

धात्रेश्वरदाता च धात्रेशप्रतिपूजकः ।
धात्रात्मा च धरानाथो धरानाथप्रवोधकः ॥ ११० ॥

धर्मिष्ठो धर्मकेतुश्च धवलो धवलप्रियः ।
धवलाचलवासी च धेनुदो धेनुपा धनी ॥ १११ ॥

ध्वनिरूपो ध्वनिप्राणो ध्वनिधर्मप्रबोधकः ।
धर्माध्यक्षो ध्वजो धूम्रो धातुरोधी विरोधकः ॥ ११२ ॥

नारायणो नरो नेता नदीशो नरवानरः ।
नंदीसंक्रमणो नाट्यो नाट्यवेत्ता नटप्रियः ॥ ११३ ॥

नारायणात्मको नन्दी नन्दी शृंगी गणाधिपः ।
नन्दिकेश्वरवर्मा च नन्दिकेश्वरपूजकः ॥ ११४ ॥

नरसिंहो नटी नर्मि नखयुद्धविशारदः ।
नखायुद्धो नलो नीलो नलनीलप्रमोदकः ॥ ११५ ॥

नवद्वारपुराधारो नवद्वारपुरातनः ।
नरनारयणस्तुत्यो नखनाथमहेश्वरः ॥ ११६ ॥

नखदंष्ट्रायुधो नित्यो निराकारो निरञ्जनः ।
निष्कलंको निरवद्यो निर्मलो निर्ममो नगः ॥ ११७ ॥

नगरग्रामपालश्च निरन्तरनगारिपः ।
नाग कन्याभयध्वंसी नागारिप्रियनागरः ॥ १८ ॥

पीताम्बरः पद्मनाभः पुण्डरीकाक्षपावनः ।
पद्माक्षः पद्मवक्त्रश्च पद्मासनप्रपूजकः ॥ ११९ ॥

पद्ममाली पद्मपरः पद्मपूजनतत्परः ।
पद्मपाणिः पद्मपादः पुण्डरीकाक्षपावनः ॥ १२० ॥

पावनः पवनात्मा च पवनात्मज पापहा ।
परः तरतरः पद्मः परमः परमात्मकः ॥ १२१ ॥

पीतांबरप्रियः प्रेम प्रेमदः प्रेमपालकः ।
प्रौढः प्रोढ़परः प्रेतदोषहा प्रेतनाशकः ॥ १२२ ॥

प्रभञ्जनान्वयः पंचपञ्चाक्षरमनुप्रियः ।
पन्नगारिः प्रतापी च प्रपन्नपरदोषहा ॥ १२३ ॥

पराभिचारशमनः परसैन्यविनाशकः ।
प्रतिवादिमुखस्तंभः पुराधारः पुरारिनुत् ॥ १२४ ॥

पराजितः परंब्रह्म परात्परपरात्परः ।
पातालगः पुराणश्च पुरातनप्लवंगमः ॥ १२५ ॥

पुराणपुरुषः पूज्यः पुरुषार्थप्रपूरकः ।
प्लवोगेशः पलाशोऽपि पृथुकः पृथिवीपतिः ॥ १२६ ॥

पुण्यशीलः पुण्यराशिः पुण्यात्मा पुण्यपालकः ।
पुण्यकीर्तिः पुण्यगीतिः प्राणदः प्राणपोषकः ॥ १२७ ॥

प्रवीणश्च प्रसन्नश्च पार्थध्वजनिवासकः ।
पिंगकेशः पिंगरोमा प्रणवः पिंगलप्रणः ॥ १२८ ॥

पराशरः पापहर्ता पिप्पलाश्रयसिद्धिदः ।
पुण्यश्लोकः पुरातीतः प्रथमः पुरुषः पुमान् ॥ १२९ ॥

पुराधारश्च प्रत्यक्षः परमेष्ठी पितामहः ।
फुल्लारविन्दवदनः फुल्लोत्कमललोचनः ॥ १३० ॥

फूत्कारः फूत्करः फूश्च फूदमंत्रपरायणः ।
स्फटिकाद्रिनिवासी च फुल्लेन्दीवरलोचनः ॥ १३१ ॥

वायुरूपी वायुसुतो वाय्वात्मा वामनाशकः ।
वनो वनचरो बालो बालत्राता तु बालकः ॥ १३२ ॥

विश्वनाथश्च विश्वमात्मा विश्वपालकः ।
विश्वधाता विश्वकर्ता विश्ववेत्ता विशांपतिः ॥ १३३ ॥

विमलो विमलज्ञानो विमलानन्ददायकः ।
विमलोत्पलवक्त्रश्च विमलात्मा विलासकृत् ॥ १३४ ॥

विन्दुमाधवपूजश्च विन्दुमाधवसेवकः ।
वीजोऽथ वीर्यदो बीजहारी बीजप्रदो विभुः ॥ १३५ ॥

विजयो बीजकर्ता च विभूतिर्भूतिदायकः ।
विश्ववन्द्यो विश्वगम्यो विश्वहर्ता विराट्तनुः ॥ १३६ ॥

तुलकारह तारार्तितर्वसुदेवो वनप्रदः ।
ब्रह्मपुच्छो ब्रह्मपरो वानरो वानरेश्वरः ॥ ३७ ॥

बलिवन्धनकृद्विश्वतेजा विश्वप्रतिष्ठितः ।
विभोक्ता च वासुदेवो वीरवीरो वसुन्धरः ॥ १३८ ॥

वनमाली वनध्वंसी वारुणो वैष्णवो बली ।
विभीषणप्रियो विष्णुसेवी वायुगविर्विदुः ॥ १३९ ॥

विपद्मवायुवंशश्च वेदवेदांगपारगः ।
बृहत्तनुर्बृहत्पादो बृहत्कायो वृहद्यशाः ॥ १४० ॥

बृहन्नासो बृहद्बाहुर्बृहन्मूर्तिर्बृहत्स्तुतिः ।
बृहद्धनुर्बृहज्जंघो बृहत्कायो बृहत्करः ॥ १४१ ॥

बृहद्रतिर्बृहत्पुच्छो बृहल्लोकफलप्रदः ।
र्बृहत्सेव्यो बृहच्छक्तिर्बृहद्विद्याविशारदः ॥ १४२ ॥

बृहल्लोकरतो विद्या विद्यादाता विदिक्पतिः ।
विग्रहो विग्रहरतो व्याधिनाशी च व्याधिदः ॥ १४३ ॥

विशिष्टो बलदाता च विघ्ननाशो विनायकः ।
वराहो वसुधानाथो भगवान् भवभंजनः ॥ १४४ ॥

भाग्यदो भयकर्ता च भागो भृगुपतिप्रियः ।
भव्यो भक्तो भरद्वाजो भयांघ्रिभयनाशनः ॥ १४५ ॥

माधवो मथुरानाथो मेघनादो महामुनिः ।
मायापतिर्मनस्वी च मायातीतो मनोत्सुकः ॥ १४६ ॥

मैनाकवन्दितामोदो मनी वेगी महेश्वरः ।
मायानिर्जितरक्षाश्च मायानिर्जितविष्टपः ॥ १४७ ॥

मायाश्रयश्च निलयो मायाविध्वंसको मयः ।
मनोयमपरो याम्यो यमदुःखनिवारणः ॥ १४८ ॥

यमुनातीरवासी च यमुनातीर्थचारणः ।
रामो रामप्रियो रम्यो राघवो रघुनंदनः ॥ १४९ ॥

रामप्रपूजको रुद्रो रुद्रसेवी रमापतिः ।
रावणारी रमानाथो वत्सलो रघुपुँगवः ॥ १५० ॥

रक्षोघ्नो रामदूतश्च रामेष्टो राक्षसान्तकः ।
रामभक्तो रामरूपो राजराजो रणोत्सुकः ॥ १५१ ॥

लंकाविध्वंसको लंकापतिघाती लताप्रियः ।
लक्ष्मीनाथप्रियो लक्ष्मीनारायणात्मपालकः ॥ ५२ ॥

प्लवगाब्धिहेलकश्च लंकेशगृहभञ्जनः ।
ब्रह्मस्वरूपी ब्राह्मत्मा ब्रह्मज्ञो ब्रह्मपालकः ॥ १५३ ॥

ब्रह्मवादी च विक्षेत्रं विश्वबीजं च विश्वदृक् ।
विश्वम्भरो विश्वमूर्तिर्विश्वकारोऽथ विश्वधृक् ॥ १५४ ॥

विश्वात्मा विश्वसेव्योऽथ विश्वो विश्वेश्वरो विदुः ।
शुक्र शुक्रः प्रदः शुक्रः शुक्रात्मा च शुभप्रदः ॥ १५५ ॥

शर्वरीपतिशूरश्च शूरश्च श्रुतिश्रवाः ।
शाकंभरीशक्तिधरः शत्रुघ्नः शरणप्रदः ॥ १५६ ॥

शंकरः शान्तिदः शांतः शिवः शूली शिवार्चितः ।
श्रीरामरूपः श्रीवासः श्रीपदः श्रीकरः शुचिः ॥ १५७ ॥

श्रीशः श्रीदः श्रीकरश्च श्रीकान्तप्रिय श्रीनिधिः ।
षोडशस्वरसंयुक्तः षोडशात्मा प्रियंकरः ॥ १५८ ॥

षडंगस्तंस्तोत्रनिरतः षडाननप्रपूजकः ।
षट्शास्त्रवेत्ता षड्बाहुः षट्स्वरूपः शडूर्मिपः ॥ १५९ ॥

सनातनः सत्यरूपः सत्यलोकप्रबोधकः ।
सत्यात्मा सत्यदाता च सत्यव्रतपरायणः ॥ १६० ॥

सौम्यः सौम्यप्रदः सौम्यदृक्सौम्यः सौम्यपालकः ।
सुग्रीवादियुतः सर्वः संसारभयनाशनः ॥ १६१ ॥

सूत्रात्मा सूक्ष्मसंध्यश्च स्थूलः सर्वगतिः पुमान् ।
सुरभिः सागरः सेतुः सत्यः सत्य पराक्रमः ॥ १६२ ॥

सत्यगर्भः सत्यसेतुः सिद्धिस्तु सत्यगोचरः ।
सत्यवादी सुकर्मा च सदानंदैक ईश्वरः ॥ १६३ ॥

सिद्धि साध्य सुसिद्धिश्च संकल्पः सिद्धिहेतुकः ।
सप्तपातालचरणः सप्तर्षिगणवन्दितः ॥ १६४ ॥

सप्ताब्धिलंघनो वीरः सप्त द्वीपोरुमण्डलः ।
सप्तांगराज्यसुखदः सप्तमातृनिषवितः ॥ १६५ ॥

सप्तच्छंदोविधिः सप्त सप्तपातालसंश्रयः ।
संकर्षणः सहस्रास्यः सहस्राक्षः सहस्रपात् ॥ १६६ ॥

हनुमान् हर्षदाता च हरो हरिहरीश्वरः ।
क्षुद्राराक्षसघाती च क्षुद्धतक्षान्तिदायकः ॥ १६७ ॥

अनादीशो ह्यनन्तश्च आनन्दोऽध्यात्मकबोधकः ।
इंद्र ईशोत्तमश्चैव उन्मत्तऋषिऋद्धिदः ॥ १६८ ॥

तृवर्णो तृपदौपेत ऐश्वर्य औषधीप्रियः ।
औषधश्चांशुमांश्चैव अकारः सर्वकारणः ॥ १६९ ॥

इत्येतद्रामदूतस्य नाम्तां चैव सहस्रकम् ।
एककालं द्विकालं वा त्रिकालं श्रद्धयान्वितः ॥ १७० ॥

पठनात्पाठनाद्वापि सर्वा सिद्धिर्भवेत्प्रिये ।
मोक्षार्थी लभते मोक्षं कामार्थी काममाप्नुयात् ॥ १७१ ॥

विद्यार्थी लभते विद्यां वेदव्याकरणादिकम् ।
इच्छाकामस्तु कामार्थी धर्मार्थी धर्ममक्षयम् ॥ १७२ ॥

पुत्रार्थी लभते पुत्रं वरायुस्सहितं पुमान् ।
क्षेत्रं च बहुसस्यं स्याद्गावश्च बहुदुग्धदाः ॥ १७३ ॥

दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ।
दुःखौघो नश्यते तस्य संपत्तिर्वर्द्धते चिरम् ॥ १७४ ॥

चतुर्विधं वस्तु तस्य भवत्येव न संशयः ।
अश्वत्थमूले जपतां नास्ति वैरिकृतं भयम ॥ १७५ ॥

त्रिकालं पठनात्तस्य सिद्धिः स्यात्करसंस्थिता ।
अर्धरात्रे रवौ धृत्वा कंठदेशे नरः शुचिः ॥ १७६ ॥

दशावर्तं पठेन्मर्त्यः सर्वान्कामानवाप्नुयात् ।
भौमे निशान्ते न्यंग्रोधमेले स्थित्वा विचक्षणः ॥ १७७ ॥

दशावर्तं पठैन्मर्त्यः सार्वभौमः प्रजायते ।
अर्कमूलेऽर्कवारे तु यो मध्याह्ने शुचिर्जपेत् ॥ ७८ ॥

चिरायुः स सुखी पुत्री विजयी जायते क्षणात् ।
ब्राह्मे मुहूर्ते चोत्त्थाय प्रत्यह् च पठेन्नरः ॥ ७६ ॥

यं यं कामयते कामं लभते तं तं न संशयः ।
संग्रामे सन्निविष्टानां वैरिविद्रावणं परम् ॥ १८० ॥

डाकिनीभूतप्रेतेषु ग्रहपीडाहरं तथा ।
ज्वरापस्मारशमनं यक्ष्मप्लीहादिवारणम् ॥ १८१ ॥

सर्वसौख्यप्रदं स्तोत्रं सर्वसिद्धिप्रदं तथा ।
सर्वान्कामानवाप्नोति वायुपुत्रप्रसादतः ॥ १८१ ॥

॥ इति श्रीरुद्रयामलोक्तहनुमत्सहस्रनामस्तोत्रम् ॥

KAVACHA OF HANUMĀN
(in Brahmāṇḍa-purāṇa)

This armour kavacha which is an excerpt from the Brahmāṇḍa-purāṇa was said to have been communicated to Vibhīshaṇa by Rāma with love and in secret. And Rāma is therefore the seer (ṛshi) of this powerful kavacha-stotra-mantra of Hanumān. Śiva tells this to Pārvati, during the course of a dialogue between Nārada and is Agastya.

श्रीगणेशाय नमः । ॐ श्री हनुमते नमः ॥

(Introduction)

एकदा सुखमासीनं शंकरं लोकशंकरम् ।
पप्रच्छ गिरजा कान्तं कर्पूरधवलं शिवम् ॥ १ ॥

पार्वत्युवाच ।
भगवन्देवदेवेश लोकनाथ जगद्गुरो ।
शोकाकुलानां लोकानाम् केन रक्षा भवेद् ध्रवम् ॥ २ ॥

संग्रामे संकटे घोरे भूतप्रेतादिके भये ।
दुःखदावाग्निसंतप्तचेतसां दुःखभागिनाम् ॥ ३ ॥

ईश्वर उवाच ।
शृणु देवि प्रवक्ष्यामि लोकानां हितकाम्यया ।
विभीषणाय रामेण प्रेम्णा दत्तं च यत्पुरा ॥ ४ ॥

कवचं कपिनाथस्य वायुपुत्रस्य धीमतः ।
गुह्य ते संप्रवक्ष्यामि विशेषाच्छृणु सुन्दरि ॥ ५ ॥

(ṛshyādi)

ॐ अस्य श्री हनुमत्कवचस्तोत्रमन्त्रस्य श्री रामचन्द्र ऋषिः ।
अनुष्टुप्छन्दः । श्री महावीरो हनुमान् देवता । मरुतात्मज इति बीजम् ।

ॐ हं हां हौं इति कवचम् ।

ॐ स्वाहा इति कीलकम् । लक्ष्मणप्राणदाता इति बीजम् ।
सकलकार्यसिद्ध्यर्थे जपे विनियोगः । अथ न्यासः ।

(kara-nyāsa)

ॐ ह्रां अंगुष्ठाभ्यां नमः ।

ॐ ह्रीं तर्जनीभ्यां नमः ।

ॐ ह्रूँ मध्यमाभ्यां नमः ।

ॐ ह्रैं अनामिकाभ्यां नमः ।

ॐ ह्रैं कनिष्ठिकाभ्यां नमः ।

ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ।

(aṅga-nyāsa)

ॐ अञ्जनीसूनवे हृदयायः नमः ।

ॐ रुद्रमूर्तये शिरसे स्वाहा ।

ॐ वायुसुताय शिखायै वषट् ।

ॐ वज्रदेहाय कवचाय हुम् ।

ॐ रामदूताय नेत्रत्रयाय वौषट् ।

ॐ ब्रह्मास्त्रनिवारणाय अस्त्राय फट् ।

रामदूताय विद्महे कपिराजाय धीमहि तन्नो हनुमान् प्रचोदयात् ।

ॐ हुं फट् इति दिग्बन्धः ॥

४पं	५वीं	६क्रीं	७सां	१जं	२ह्रीं	३श्रीं
२ह्रीं	३श्रीं	४हं	५वीं	६क्रीं	७सां	१जं
७सां	१जं	२ह्रीं	३श्रीं	४वीं	५वीं	६क्लीं
५वीं	६क्लीं	७सां	१हं	२ह्रीं	३श्रीं	४वीं
३श्रीं	४वीं	५ऐं	६क्रीं	७सां	१जं	२ह्रां
१जं	२ह्रां	३श्रीं	४वीं	५ऐं	६क्लीं	७सां
६क्लीं	७सां	१अं	२ह्रां	३श्रीं	४वीं	५ऐं

(dhyāna)

ओं ध्यायेद् बालदिवाकरद्युतिनिभं देवारिदर्पापिहं ।
देवेन्द्रप्रमुखप्रशस्तयशसं देदीप्यमानं रुचा ॥

(kavacha-stotra)

सुग्रीवादिसमस्तवानरयुतं सुव्यक्ततत्त्वप्रियं ।
संरक्तारुणलोचनं पवनजं पीताम्बरालंकृतम् ॥ १ ॥

उद्यन्मार्तण्डकोटिप्रकटरुचियुतं चारुवीरासनस्थं ।
मौञ्जीयज्ञोपवीताऽरुणरुचिरशिखाशोभितं कुण्डलांगम् ॥
भक्तानामिष्टदं तं प्रणतमुनिजनं वेदनादप्रमोदं ।
ध्यायेद्देवं विधेयं प्लवगकुलपतिं गोष्पदीभूतवार्धिम् ॥ २ ॥

वज्रांग पिंगकेशाढ्यं स्वर्णकुण्डलमण्डितम् ।
नियुद्धकर्मकुशलं पारावारपराक्रमम् ॥ ३ ॥

वामहस्ते महावृक्षं दशास्यकरखण्डनम् ।
उद्यद्दक्षिणदोर्दण्डं हनुमन्तं विचिन्तयेत् ॥ ४ ॥

स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृतांजलिम् ।
कुण्डलद्वयसंशोभिमुखाम्भोजं हरिं भजेत् ॥ ५ ॥

उद्यदादित्त्यसंकाशमुदारभूजविक्रमम् ।
कन्दर्पकोटिलावण्यं सर्वविद्याविशारदम् ॥ ६ ॥

श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम् ।
अभयं वरदं दोर्भ्यां कलये मरुतात्मजम् ॥ ७ ॥

अन्याजित नमस्तेऽस्तु नमस्ते रामपूजित ।
प्रस्थानं च करिष्यामि सिद्धिर्भवतु मे सदा ॥ ८ ॥

यो वारांनिधिमल्पपल्वलमिवोल्लङघ्य प्रतापान्वितो ।
वैदेहीघनशोकतापहरणो वैकुण्ठतत्त्वप्रियः ॥
अक्षादूर्जितराक्षसेश्वरमहादर्पापहारी रणे ।
सोऽयं वानरपुंगवोऽवतु सदा युष्मान्समीरात्मजः ॥ ९ ॥

वज्रांगं पिंगकेशं कनकमयलसत्कुण्डलाक्रान्तगण्डं ।
नानाविद्याधिनाथं करतलविधृतं पूर्णकुम्भं दृढं च ॥
भक्ताभीष्टाधिकारं निहतनरभुजं सर्वदा सुप्रसन्नं ।
त्रैलोक्यत्राणहेतुं सकलभुवनगं रामदूतं नमामि ॥ १० ॥

द्यल्लङ्गुलकेशप्रचलजलधरं भूममूर्तिं कपीन्द्रं ।
वन्दे रामाङिंघ्रप्रहाभ्रमरणरिव्रतं तत्त्वसारं प्रसन्नं ॥
वज्रांगं वज्ररूपं कनकमयलसत्कुण्डलाक्रान्तगण्डं ।
दम्भोलिस्तम्भसारप्रहरणविकटं भूतरक्षोधिनाथम् ॥ ११ ॥

वामे करे वीरगदां वहन्तं शैलं च दक्षे निजकण्ठलग्नम् ।
दधानमासाद्य सुवर्णवर्णं भजे ज्वलत्कुण्डलं रामदूतम् ॥ १२ ॥

पद्मरागमणिकुण्डलत्विषा पाटलीकृतकपोलमण्डलम् ।
दिव्यदेहकदलीवनान्तरे भावयामि पवमाननन्दनम् ॥ १३ ॥

ईश्वर उवाच ।
इति वदति विशेषाद्राघवो राक्षसेन्द्रं ।
प्रमुदितवरचित्तो रावणस्यानुजो हि
रघुवरवरदूतं पूजयामास भूयः ।
स्तुतिभिरतिकृतार्थं स्वं परं मन्यमानः ॥ १४ ॥

वन्दे विद्युद्वलयसुभगं स्वर्णयज्ञोपवीतं ।
कर्णद्वन्द्वे कनकरुचिरे कुण्डले धारयन्तम् ॥
उच्चैर्हृष्यद्द्युमणिकिरणश्रोणिसम्भाविताांगं ।
सत्कौपीनं कपिवरवृतं कामरूपं कपीन्द्रन् ॥ १५ ॥

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं श्रीरामदूतं सततं स्मरामि ॥ १६ ॥

(mantra-nyāsa)

ओं नमो भगवते हृदयाय नमः ।
ॐ नमो आञ्जनेयाय शिरसे स्वाहा ।
ॐ रुद्रमूर्तये शिखायै वषट् ।
ॐ रामदूताय कवचाय हुम् ।
ॐ हनुमते नेत्रत्रयाय वौषट् ।
ॐ अग्निगर्भाय अस्त्राय फट् ।
ॐ नमो भगवते अंगुष्टाभ्यां नमः ।
ॐ अंजनेयाय तर्जनीभ्यां नमः ।
ॐ रुद्रमूर्तये मध्यमाभ्यां नमः ।
ॐ रामदूताय अनामिकाभ्यां नमः ।
ॐ हनुमते कनिष्ठिकाभ्यां नमः ।
ॐ अग्निगर्भाय करतलकरपृष्ठाभ्यां नमः ।

(the mantra) अथ मन्त्र उच्यते ।

(१) ॐ ऐं ह्रा ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः । श्री नमो भगवते महाबलपराक्रमाय भूत-प्रेत-पिशाच-शकिनी-डाकिनी-यक्षिणि-पूतनी-मारी-महामारी-यक्ष-राक्षस-भैरव बेतालग्रहराक्षसादिकं क्षणेन हन हन भंजय भंजय मारय मारय शिक्षय शिक्षय महामाहेश्वररुद्रावतार हुं फट् स्वाहा ।

(२) ॐ नमो भगवते हनुमदाख्यरुद्राय सर्वदुष्टजनमुखस्त
कुरु कुरु ह्रां ह्रीं ह्रं ठं ठं ठं फट् स्वाहा ।

(३) ॐ नमो भगवते अंजनीगर्भम्भूताय रामलक्ष्माणनन्दकाय कपिसैन्यप्रकाशनायपर्वतोत्पाटनाय सुग्रीवसाधकाणे रणोच्चाटनाय कुमारब्रह्मचारिमे गम्भीरशब्दोदयाय ।

ॐ ह्रां ह्रीं ह्रूं सर्वदुष्टान् निवारणाय स्वाहा ।

(४) ॐ नमो हनुमते सर्व ग्रहान् भूतभविष्यद्वर्तमान् दूरस्थान् समीपस्थान् सर्वकाल दुष्ट दुर्बुद्धीनुचाटयोच्चाटय परबलानि क्षोभय क्षोभय मम सर्वकार्यं साधय साधय हनुमते ॐ ह्रां ह्रीं ह्रूं फट् देहि

ॐ शिवं ॐ सिद्धं ह्रां ह्रीं ह्रौं ॐ स्वाहा ।


(५) ॐ नमो हनुमते परकृतयन्त्रमन्त्रपराऽहंकारभूतप्रेतपि-शाचपरदृष्टिरार्वविघ्नदुर्जनचेटकविद्यासर्वग्रहभयान्निवारय निवारय वध वध पच पच दल दल चिलु चिलु किल किल सर्व कुयन्त्राणि दुष्टवाचं फट् स्वाहा ।

(६) ॐ नमो हनुमते पाहि पाहि एहि एहि सर्व ग्रहभूतानां शाकिनीडाकिनानां ज्वल प्रज्वल भूतमण्डलं प्रेतमण्डलं पिशाचमण्डलं निवाराय निराशय । भूतज्वरप्रेतज्वरचातुर्थिकज्वरविषमज्वरमाहेश्वरान् छिन्धि छिन्दि भिन्धि भिन्धि अक्षिशूलवक्षः शूलशिरोऽभ्यन्तरशूलगुल्मशूलपित्तशूलब्रह्मराक्षसकुलपरकुलनागकुलविषं नाशय नाशय निर्विषं कुरु कुरु फट् ।

ॐ ह्रौं सर्वदुष्टग्रहान्निवारय स्वाहा ।

(७) ॐ नमो हनुमते पवनपुत्राय वैश्वानरमुखाय हनहनान्त्या दृष्ट्या पापदृष्टिं षण्ढदृष्टिं हन हन हनुमदाज्ञया स्फुर स्फुर स्वाहा ।

(Kavacha)



श्री रामचन्द्र उवाच ।

हनुमान्पूर्वतः पातु दक्षिणे पवनात्मजः ।
पातु प्रतीच्यां रक्षोघ्नः पातु सागरपारगः ॥ १ ॥

उदीच्यामूर्ध्वगः पातु केसरिप्रियनन्दनः ।
अधश्च विष्णुभक्तस्तु पातु मध्यं च पावनिः ॥ २ ॥

अवान्तरदिशः पातु सीताशोकविनाशनः ।
लंकाविदाहकः पातु सर्वापद्भ्यो निरन्तरम् ॥ ३ ॥

सुग्रीवसचिवः पातु मस्तकं वायुनन्दनः ।
भालं पातु महावीरो भ्रुवोर्मध्ये निरन्तरम् ॥ ४ ॥

नेत्रे छायापहारी च पातु नः प्लवगेश्वर ।
कपोलौ कर्णमूले तु पातु श्रीरामकिंकरः ॥ ५ ॥

नासाग्रमंजनीसूनुर्वक्त्रं पातु हरीश्वरः ।
वाचं रुद्रप्रियः पातु जिह्वां पिंगललोचनः ॥ ६ ॥

पातु दन्तान् फाल्गुनेष्टश्चिबुकं दैत्यप्राणहृत् ।
पातु कण्ठं च दैत्यारिः स्कन्धौ पातु सुरार्चितः ॥ ७ ॥

भुजौ पातु महातेजाः करौ च चरणायुधः ।
नाखान्नखायुधः पातु कुक्षिं पातु कपीश्वरः ॥ ८ ॥

वक्षो मुद्रापहारी च पातु पार्श्वे भुजायुधः ।
लंकाविभञ्जनः पातु पृष्ठदेशं निरन्तरम् ॥ ९ ॥

नाभिं च रामदूतस्तु कटिं पात्वनिलात्मजः ।
गुह्यं पातु महाप्राज्ञः सक्थिनी च शिवप्रियः ॥ १० ॥

ऊरू च जानुनी पातु लंकाप्रसादभंजनः ।
जंघे पातु महाबाहुर्गुल्फौ पातु महाबलः ॥ ११ ॥

अचलोद्धोरकः पातु पादौ भास्करसन्निभः ।
पादान्ते सर्वसत्वाढ्यः पातु पादांगुलीस्तथा ॥ १२ ॥

(phala-stuti)

स एव पूरुषः श्रेष्ठो भुक्तिं मुक्तिं च विन्दति ।
त्रिकालमेककालं वा पठेन्मासत्रयं सदा ॥ १४ ॥

सर्वान् रिपून्क्षणाद् जित्वा स पुमांच्छ्रियमाप्नुयात् ।
मध्यरात्रे जले स्थित्वा सप्तवारं पठेद्यदि ॥ १५ ॥

क्षयापस्मारकुष्ठादितापत्रयनिवारणम् ।
आर्किवारेऽश्वत्थमूले स्थित्वा पठति यः पुमान् ॥ १६ ॥

अचलां श्रियमाप्नोति संग्रामे विजयी भवेत् ॥ १७ ॥

यः करे धारयेन्नित्यं स पुमान् श्रियमाप्नुयात् ।
विवाहे दिव्यकाले च द्यूते राजकुलेरणे ॥ १८ ॥

भूतप्रेतमहादुर्गे रणे सागरसम्प्लवे ।
दशवारं पठेद्रात्रौ मिताहारो जितेन्द्रियः ॥ १६ ॥

विजयं लभते लोके मानवेषु नराधिपः ।
सिंहव्याघ्रभये चोग्रशरशस्त्रास्त्रपातने ॥ २० ॥

शृंखलाबन्धने चैव काराग्रहणकारणे ।
कार्यस्तम्भे वह्निदाहे गात्ररोगे च दारुणे ॥ २१ ॥

शोके महारणे चैव ब्रह्मग्रहविनाशने ।
सर्वदा तु पठेन्नित्यं जयमाप्नोत्यसंशयम् ॥ २२ ॥

(dhāraṇa-vidhi)

भूर्जे वा वसने रक्ते क्षौमे वा तालपत्रके ।
त्रिगन्धेनाथवा मष्या लिखित्वा धारयेन्नरः ॥ २३ ॥

पंचसप्तत्रिलोहैर्वा गौपितं कवचं शुभम् ।
गले वा बाहुमूले वा कण्ठे शिरसि धारितम् ।
सर्वान्कामानवाप्नोति सत्यं श्रीरामभाषितम् ॥ २४ ॥

उल्लंघ्य सिन्धोः सलिलं सलीलं यःशोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लंकां नमामि तं प्रांजलिरांजनेयम् ॥

(dvādaśa-nāma)

ॐ हनुमानञ्जनीसूनुर्वायुपुत्रो महाबलः ।
रामेष्टः फाल्गुनसखः पिंगाक्षोऽमितविक्रमः ॥

उदधिक्रमणश्चैव सीताशोकविनाशनः ।
लक्ष्मणप्राणदाता च दशग्रीवस्य दर्पहा ॥

द्वादशैतानि नामानि कपीन्द्रस्य महात्मनः ।
स्वापकाले प्रबोधे च यात्राकाले च यः पठेत् ॥

तस्य सर्वभयं नास्ति रणे च विजयी भवेत्
धनं धान्यं भवेत् तस्य दुःखं नैव कदाचन ॥

॥ इति श्रीब्रह्माण्डपुराणे नारदागस्त्यसंवादे
श्रीरामचन्द्रप्रोक्तमेकमुखिहनुमत्कवचं सम्पूर्णम् ॥

KAVACHA OF HANUMĀN WITH FIVE FACES

(In Sudarśana-samhita)

अथ श्री पञ्चमुखिहनुमत्कवचप्रारम्भः सुदर्शनसंहितायाम् ॥

This armour (kavacha) from Sudarśana-samhitā visualizes Hanumān with five faces: Hanumān (east), Narasimha (south), Guruḍa (west), Varāha (north) and Hayagrīva (top). This is Hanumān facing all directions (viśvatomukha). The form has ten hands carrying sword, trident, magical weapon (khaṭvāṅga), noose, goad, mountain, fist, tree and water-pot.

अस्य श्रीपञ्चमुखिहनुमत्कवचस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः ।
गायत्री छन्दः । श्री हनुमान् देवता । रां बीजम् । म शक्तिः । चन्द्रः कीलकम् ।
ॐ रौं कवचाय हुम् । हौं अस्त्राय फट् ॥

ईश्वर उवाच ।

अथ ध्यानं प्रवक्ष्यामि शृणु सर्वांगसुन्दरम् ।
यत्कृतं देवदेवेशि ध्यानं हनुमतः प्रियम् ॥ १ ॥

पंचवक्त्रं महाभीमं कपियूथसमन्वितम् ।
बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदम् ॥ २ ॥


पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम् ।
दंष्ट्राकरालवदनं भ्रूकुटीकुटिलेक्षणम् ॥ ३ ॥

अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम् ।
अत्युग्रतेजोवपुष्कं भीषणं भयनाशनम् ॥ ४ ॥

पश्चिमे गारुडं वक्त्रं वक्रतुण्डं महाबलम् ।
सर्वनागप्रशमनं सर्वभूतादिकृन्तनम् ॥ ५ ॥

उत्तरे सौकारं वक्त्रं कृष्णदीप्तनभोभयम् ।
पाताले सिद्धवेतालज्वररोगादिकृन्तनम् ॥ ६ ॥

ऊर्ध्वं हयाननं घोरं दान्वान्तकरं परम् ।
येन वक्त्रेण विप्रेन्द्र ताटकाया महाहवे ॥ ७ ॥



॥ सर्वतोभद्रम् ॥

SARVATO-BHADRA-MANTRA

दुर्गतेः शरणं तस्य सर्वशत्रुहरं परम् ।
ध्यात्वा पञ्चमुखं रुद्रं हनुमन्तं दयानिधिम् ॥ ८ ॥

खड्गं त्रिशूलं खट्वांगं पाशांमंकुशपर्वतम् ।
मुष्टौ तु मोदकौ वृक्षं धारयन्तं कमण्डलुम् ॥ ९ ॥

भिन्दिपालं ज्ञानमुद्रां दशमं मुनिपुंगवम् ।
एतान्यायुधजालानि धारयन्तं भयापहम् ॥ १० ॥

दिव्यमाल्याम्बरधरं दिव्यगंधानुलेपनम् ।
सर्वैश्वर्यमयं देवं हनुमद्विश्वतोमुखम् ॥ ११ ॥

पञ्चास्यमच्युतमनेकविचित्रवर्णवक्त्रं सकम्बु दधतं करिराजवीर्यम् ।
पीताम्बरादिमुकुटैरपि शोभितांगं पिंगाक्षमंजनिसुतं ह्यनिशं स्मरामि ॥ १२ ॥

मर्कटस्य महोत्साहं सर्वशोकविनाशनम् ।
शत्रुसंहारकं चैतत्कवचं ह्यापदं हरेत् ॥ १३ ॥

(१) ॐ हरिमर्कटमर्कटाय स्वाहा ॥
(२) ॐनमो भगवते पंचवदनाय पूर्वकपिमुखाय सकलशत्रुसंहारणाय स्वाहा ॥ १५ ॥
(३) ॐ नमो भगवते पंचवदनाय उत्तरमुखाय आदिवराहाय सकलसम्पत्कराय स्वाहा ॥२६॥
(४) ॐ नमो भगवते पंचवदनाय ऊर्ध्वमुखाय हयग्रीवाय सकलजनवश्यकराय स्वाहा ॥२७॥

॥ इति मूलमन्त्राः ॥

(nyāsas)

ॐ अस्य श्रीपंचमुखिहनुमत्कवचस्तोत्रमन्त्रस्य श्रीरामचन्द्र ऋषिः ।
अनुष्टुप्छन्दः । श्रीरामचन्द्रो देवता । सीता इति बीजम् । हनुमानिति शक्तिः ।
हनुमत्प्रीत्यर्थे जपे विनियोगः । पुनर्हनुमानिति बीजम् । ॐ वायुपुत्राय इति शक्तिः ।
अंजनीसुतायेति कीलकम् । श्रीरामचन्द्रवरप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ हं अंजनीसुताय मध्यमाभ्यां नमः ।
ॐ रां रामदूताय अनामिकाभ्यां नमः ।
ॐ रं रुद्रमूर्तये कनिष्ठिकाभ्यां नमः ।
ॐ सं सीताशोकनिवारणाय करतलकरपृष्ठाभ्यां नमः ।

ॐ अंजनीसुताय हृदयाय नमः ।
ॐ रुद्रमूर्तये शिरसे स्वाहा ।
ॐ वायुपुत्राय शिखायै वषट् ।
ॐ अग्निगर्भाय कवचाय हुम् ।
ॐ रामदूताय नेत्रत्रयाय वौषट् ।
ॐ पंचमुखिहनुमते अस्त्राय फट् ।

(Shaṭ-karma-prayoga)

श्री रामदूताय आंजनेयाय वायुपुत्राय महाबलाय सीताशोकनिवारणाय, महाबलप्रचण्डाय, लंकापुरीदहनाय, फाल्गुनसखाय कोलाहलसकलब्रह्माण्डविश्वरूपाय, सप्तसमुद्रान्तराललंघिताय, पिंगलनयनायामितविक्रमाय, सूर्यबिम्बफलसेवाधिष्ठितपराक्रमाय, संजीवन्या-अंगदलक्ष्मणमहाकपिसैन्यप्राणदात्रे दशग्रीवविध्वंसनाय, रामेष्टाय, सीतासहितरामचन्द्रवरप्रसादाय, षट्प्रयोगागमपंचमुखिहनुमन्मन्त्रजपेविनियोगः ।

(१) ॐ हरिमर्कटमर्कटाय स्वाहा । हरिमर्कटमर्कटाय, वं, वं, वं, वं, फट् स्वाहा ।

(२) हरिमर्कटमर्कटाय फं, फं, फं, फं, फं, फट् स्वाहा ।

(३) ॐ हरिमर्कटमर्कटाय खं, खं, खं, खं, खं, मारणाय स्वाहा ।

(४) ॐ हरिमर्कटमर्कटाय ठं, ठं, ठं, ठं, ठं, स्तम्भनाय स्वाहा ।

(५) ॐ हरिमर्कटमर्कटाय डं, डं, डं, डं, डं,आकर्षणाय सकलसम्पत्कराय पंचमुखी वीरहनुमते स्वाहा ।

(६) उच्चाटने

ॐ ढं, ढं, ढं, ढं, ढं, कूर्ममूर्तये पंचमुखिहनुमते परयन्त्रतन्त्रोच्चाटनाय स्वाहा ।
कं, खं, गं, घं, ङं, चं, छं, जं, झं, ञं, टं, ठं, डं, ढं, णं, तं, थं, दं, धं, नं, पं, फं, बं, भं, मं, यं, रं, लं, वं, शं, षं, सं, हं, क्षं, स्वाहा इति दिग्बन्धः ।

(pañcha-mukha mantras)

ॐ पूर्वकपिमुखाय पंचमुखिहनुमते ठं, ठं, ठं, ठं, ठं सकलशत्रुसंहरणाय स्वाहा ।

ॐ दक्षिणमुखे पंचमुखिहनुमते करालवदनाय नरसिंहाय
हां, हां, हां हां हां, सकलभूतप्रेतदमनाय स्वाहा ।

ॐ पश्चिममुखे, गरुडासनाय पंचमुखि वीरहनुमते
मं, मं, मं, मं, मं सकलविषहराय स्वाहा ।

ॐ उत्तरमुखे आदिवराहाय लं, लं, लं, लं, लं, नृसिंहाय नीलकण्ठाय पंचमुखिहनुमते स्वाहा। अंजनीसुताय वायुपुत्राय, महाबलाय, रामेष्टफाल्गुनसखाय सीताशोकनिवारणाय, लक्ष्मणप्राणरक्षकाय, कपिसैन्यप्रकाशाय, दशग्रीवाभिमानदहनाय, श्री रामचन्द्रवरप्रसादकाय, महावीर्याय, प्रथमब्रह्माण्डनायकाय, पंचमुखिहनुमते, भुत-प्रेत-पिशाय-ब्रह्मराक्षस-शाकिनी-डाकिनी अन्तरिक्ष-ग्रह-परयन्त्र-परतन्त्र-सर्वग्रहोच्चाटनाय, सकलशत्रुसंहरणाय, पंचमुखिहनुमद्वरप्रसादाय, सर्वरक्षकाय जं, जं, जं, जं, स्वाहा ।

(phala-stuti)

पठित्वेदं तु कवचं महान्तं कवचं पठेत् ।
एकवारं पठेन्नित्यं सर्वशत्रुनिवारणम् ।। १ ।।

द्विवारं तु पठेन्नित्यं पुत्रपौत्रप्रवर्द्धनम् ।
त्रिवारं पठते नित्यं सर्वसम्पत्करं परम् ।। २ ।।

चतुर्वारं पठेन्नित्यं सर्वमर्त्यवशंकरम् ।
पंचवारं पठेन्नित्यं सर्वरोगनिवारणम् ।। ३ ।।

षड्वारं तु पठेन्नित्यं सर्वदेव वशीकरम् ।
सप्तवारं पठेन्नित्यं सर्वकामार्थसिद्धिदम् ।। ४ ।।

अष्टवारं पठेन्नित्यं सर्वसौभाग्यदायकम् ।
नववारं पठेन्नित्यं सर्वैश्वर्यप्रदायकम् ।। ५ ।।

दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम् ।
एकादशं पठेन्नित्यं सर्वसिद्धिं लभेन्नरः ।। ६ ।।

कवचं स्मृतिमात्रेण महालक्ष्मीफलप्रदम् ।
तस्माच्च प्रयता भाव्यं कार्यं हनुमतः प्रियम् ।। ७ ।।

।। इति श्रीचिन्तामणिरामभद्रे सुदर्शनसंहितायां पंचमुखिहनुमत्कवचं सम्पूर्णम् ।।

KAVACHA OF HANUMĀN WITH SEVEN FACES

(In Sudarśana-samhitā)

अथ श्री श्रीसप्तमुखिहनुमत्कवचप्रारम्भः

This armour (kavacha), extracted from Sudarśana-samhitā as detailed in Ātharavaṇa-rahasya, visualizes Hanumān with seven faces: monkey (vānara), lion (simha), serpent (sarpa) boar (varāha), dog (śva), cow (go) and man (manushya). The form has fourteen hands, carrying tree, mountain, discus, mace, kheṭaka, khaṭvāṅga, ploughshare, goad, serpent, pot of nectar, arrow, lotus, spear and gesture of protection.

उक्तं चाथर्वणरहस्ये -

ॐ अस्य श्री सप्तसुखीवीरहनुमत्कवचस्तोत्रमान्त्रस्य नारदऋषिः अनुष्टुप्छंदः
श्री सप्तमुखिकपिः परमात्मा देवता । ह्रां बीजम् । ह्रीं शक्तिः ह्रूं कीलकम् ।
मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

(kara-nyāsa as before)

ॐ ह्रां अंगु० ॐ ह्रीं ॐ ह्रूं मध्य० ॐ ह्रैं अना० ॐ ह्रीं कनि०

ॐ ह्रः कर० । एव हृदयादिन्यासः ।

(dhyāna)

अथ ध्यान्

वन्दे वानरसिंहसर्परिपुवाराहाश्वगोमानुषैर्युक्तं सप्तमुखैः करैर्द्रुमगिरिं चक्रं गदां खेटकम् ।
खट्वांगं हलमंकुशै फणिसुधाकुम्भौ शराब्जाभयाञ्छूलं सप्तशिखं दधानममरैः सेव्यं कपिं
कामदम् ॥

(kavacha)

ब्रह्मोवाच ।

सप्त शीर्ष्णः प्रवक्ष्यामि कवचं सर्वसिद्धिदम् ।
जप्त्वा हनुमतो नित्यं सर्वपापैः प्रमुच्यते ॥ १ ॥

सप्तस्वर्गपतिः पायाच्छिखां मे मारुतात्मजः ।
सप्तमूर्धा शिरोऽव्यान्मे सप्तार्चिर्भालदेशकम् ॥ २ ॥

त्रिःसप्तनेत्रो नेत्रेऽव्यात्सप्तस्वरगतिः श्रुती ।
नासां सप्तपदार्थोऽव्यान्मुखं सप्तमुखोऽवतु ॥ ३ ॥

सप्तजिह्वस्तु रसनां रदान्सप्तहयोऽवतु ।
सप्तच्छदो हरिः पातु कण्ठं बाहू गिरिस्थितः ॥ ४ ॥

करौ चतुर्दशकरो भूधरोऽव्यान्ममांगुलीः ।
सप्तर्षिध्यातो हृदयमुदरं कुक्षिसागरः ॥ ५ ॥

सप्तद्वीपपतिश्चित्तं सप्तव्याहृतिरूपवान् ।
कोटिं में सप्तसंस्थार्थदायकः सक्थिनी मम ॥ ६ ॥

सप्तग्रहस्वरूपी मे जानुनी जंघयोस्तथा ।
सप्तधान्यप्रियः पादौ सप्तपातालधारकः ॥ ७ ॥

पशून्धनं च धान्यं च लक्ष्मीं लक्ष्मीप्रदोऽवतु ।
दारान् पुत्रांश्च कन्याश्च कुटुंबं विश्वपालकः ॥ ८ ॥

अनुक्तस्थानमपि मे पायाद्वायुसुतः सदाः ।
चौरेभ्यो व्यालदंष्ट्रिभ्यः शृंगिभ्यो भूतराक्षसात् ॥ ९ ॥

दैत्येभ्योऽप्यथ यक्षेभ्यो ब्रह्मराक्षसजाद्भयात् ।
दंष्ट्राकरालवदनो हनुमन्मां सदाऽवतु ॥ १० ॥

परशस्त्रमन्त्रतन्त्रयन्त्राग्निजलविद्युतः ।
रुद्रांशः शत्रुसंग्रामात्सर्वावस्थासु सर्वभूत् ॥ ११ ॥

(matras)

(१) ॐ नमो भगवते सप्तवदनाय आद्यकपिमुखाय, वीरहनुमते
सर्वशत्रुसंहारणाय, ठं ठं ठं ठं ठं ठं ठं ॐ नमो स्वाहा ॥ १२ ॥

(२) ॐ नमो भगवते सप्तवदनाय, द्वितीयनारसिंहास्याय, अत्युग्रतेजोवपुषे,
भीषणाय भयनाशनाय, हं हं हं हं हं हं हं ॐ नमः स्वाहा ॥ १ ॥

(३) ॐ नमो भगवते सप्तवदनाय तृतीयगरुडवक्त्राय वज्रदंष्ट्राय महाबलाय
सर्वरोगविनाशनाय मं मं मं मं मं मं मं ॐ नमः स्वाहा ॥ २ ॥

(४) ॐ नमो भगवते सप्तवदनाय चतुर्थक्रोडतुण्डाय सौमित्रिरक्षकाय
पुत्रांद्यभिवृद्धिकराय लं लं लं लं लं लं लं ॐ नमः स्वाहा ॥ ३ ॥

(५) ॐ नमो भगवते सप्तवदनाय पंचमाश्ववदनाय रुद्रमूर्त्तये सर्ववशीकरणाय सर्वांगामस्वरूपाय रुं रुं रुं रुं रुं रुं रुं ॐ नमः स्वाहा ॥ ४ ॥

(६) ॐ नमो भगवते सप्तवदनाय षष्ठगोमुखाय सूर्यस्वरूपाय सर्वरोगहराय मुक्तिदात्रे ॐ ॐ ॐ ॐ ॐ ॐ ॐ नमः स्वाहा ॥ ५ ॥

(७) ॐ नमो भगवते सप्तवदनाय सप्तमानुषमुखाय रुद्रावताराय अंजनीसुताय सकलदिग्यशोविस्तारकाय वज्रदेहाय सुग्रीवसाह्यकराय उदधिलंघनाय सीताशुद्धिकराय लंकादहनाय अनेकाराक्षसांतकाय रामानन्ददायकाय अनेकपर्वतोत्पाटकाय सेतुबंधकाय कपिसैन्यनायकाय रावणांतकाय ब्रह्मचर्याश्रमिणे कोपीनब्रह्मसूत्रधारकाय रामहृदयाय सर्वदुष्टग्रहनिवारणाय शाकिनीडाकिनीबेतालब्रह्मराक्षसभैरवग्रहयक्षग्रहपिशाचग्रहब्रह्मग्रह क्षत्रियग्रह वैश्यग्रह शूद्रग्रहांत्यजग्रहम्लेच्छग्रहसर्पग्रहोच्चाटकाय मम सर्वकार्यसाधकाय सर्वशत्रुसंहारकाय सिंहव्याघ्रादिदुष्टसत्त्वाकर्षकायैकाहिकादिविविधज्वरच्छेदकाय परयंत्रमंत्रनाशकाय सर्वव्याधिनिकृन्तकाय सर्पादिसर्वस्थावरजंगमविषस्तंभनकराय सर्वराजभय चोरभयाग्निभयप्रशमनायाध्यात्मिकाधिदैविकाधिभौतिक तापत्रयनिवारणाय सर्वविद्यासर्वसंपत्सर्वपुरुषार्थदायकायासाध्यकार्यसाधकाय सर्ववरप्रदाय सर्वाभीष्टकराय

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रः ॐ नमः स्वाहा ॥ १ ॥

(phala-stuti)

य इदं कवचं नित्यं सप्तास्यस्य हनूमतः ।
त्रिसंध्यं जपते नित्यं सर्वशत्रुविनाशनम् ॥ १ ॥

पुत्रपौत्रप्रदं सर्वं संपद्राज्यप्रदं परम् ।
सर्वहरं चायुः कीर्तिदं पुण्यवर्धनम् ॥ २ ॥

राजानं सर्वशं नीत्वा त्रैलोक्यविजयी भवेत् ।
इदं हि परमं गोप्यं देयं भक्तियुताय च ॥ ३ ॥

नामानि सर्वाण्यपवर्ग दानिरूपाणि विश्वानि च यस्य सन्ति ।
कर्माणि देवैरपि दुर्घटानि तं मारुतिं सप्तमुखं प्रपद्ये ॥ ४ ॥

॥ इति सुदर्शनसंहितायां सप्तमुखिहनुमत्कवचं सम्पूर्णम् ॥

KAVACHA OF HANUMĀN WITH FIVE FACE
(In Rudra-Yāmala)

अथ श्री एकादशमुखिहनुमत्कवचप्रारम्भः ॥

This kavacha, extracted from Rudra-yāmala in the dialogue between Śiva and Pārvati, visualizes Hanuman with eleven faces, representing the eleven forms of Rudra (ekādaśa-rudra). The armour invokes protection in all the ten directions, and the faces are those of monkey, fish, tortoise, boar, lion, falcon, śarabha, bull, flames and cat in the ten directions clockwise beginning with east. The eleventh face is for all directions together.

ॐ श्रीसमस्त जगन्मङ्गलात्मने नमः ।

(Introduction)

श्री देव्युवाच -

शैवानि गाणपत्यानि शाक्तानि वैष्णवानि च ।
कवचानि च सौराणि यानि चान्यानि तानि च ॥ १ ॥

श्रुतानि देवदेवेश त्वद्वक्त्रान्निःसृतानि च ।
किंचिदन्यत्तु देवानां कवचं यदि कथ्यते ॥ २ ॥

ईश्वर उवाच -

श्रुणु देवि प्रवक्ष्यामि सावधानावधारय ।
हनुमत्कवचं पुण्यं महापातकनाशनम् ॥ ३ ॥

एतद्गुह्यतमं लोके शीघ्र सिद्धिकरं परम् ।
जयो यस्य प्रसादेन लोकत्रयजितो भवेत् ॥

(ṛshyādi)

ॐ अस्य श्रीएकादशवक्त्रहनुमत्कवचमालामन्त्रस्य वीररामचन्द्र ऋषिरनुष्टुप्छन्दः । श्री महावीरहनुमान् रुद्रो देवता । हौं हौं बीजं स्फें कीलकं सर्वदूतस्तम्भनार्थं जिह्वाकीलनार्थं मोहनार्थं राजमुखीदेवतावश्यार्थं ब्रह्मराक्षसशाकिनीडाकिनी भूतप्रेतादि बाधापरिहारार्थं श्रीहनुमद्दिव्यकवचाख्यमालामन्त्र जपे विनियोगः ।

(nyāsa)

ॐ ह्रौं आञ्जनेयाय अंगुष्ठाभ्यां नमः ।

ॐ स्फ़ें रुद्रमूर्त्तये तर्जनीभ्यां नमः ।

ॐ स्फ़ें रामदूताय कनिष्ठिकाभ्यां नमः ।

ॐ ह्रौं ब्रह्मास्त्रादिनिवारणाय करतलकरपृष्ठाभ्यां नमः । एवं हृदयादि ।

ॐ ह्रौं आञ्जनेयाय हृदयाय० ।

ॐ स्फ़ें रुद्रमूर्त्तये शिरसे स्वाहा ।

ॐ स्फ़ें वायुपुत्राय शिखाय वषट् ।

ह्रौं अंजनीगर्भाय कवचाय हुम् ।

ॐ स्फ़े रामदूताय नेत्रत्रयाय वौषट् ।

ॐ ह्रौं ब्रह्मास्त्रादिनिवारणाय अस्त्राय फट् । इति न्यासः ।

(dhyāna)

अथ ध्यानम् -

ॐ ध्यायेद्रणे हनुमन्तमेकादशमुखाम्बुजम् ।
ध्यायत्तं रावणोपेतं दशबाहुं त्रिलोचनम् ।
हाहाकारैः सदर्पैश्च कम्पयन्तं जगत्त्रयम् ।
ब्रह्मादिवन्दितं देवं कपिकोटिसमन्वितम् ।
एवं ध्यात्वा जपेद्देवि कवचं परमाद्भुतम् ॥

(kavacha)

(१) ॐ इन्द्रदिग्भागे गजारूढ़हनुमते ब्रह्मास्त्रशक्तिसहिताय चौर व्याघ्रपिशाचब्रह्मराक्षसशाकिनीडाकिनीवैतालसमूहोच्चाटनाय मां रक्ष स्वाहा ॥ १ ॥

(२) ॐ अग्निदिग्भागे मेषारूढहनुमते अग्न्स्त्रशक्तिसहिताय चौरव्याघ्रपिशाचब्रह्मराक्षसशाकिनीडाकिनी वैतालसमूहोच्चाटनाय मां रक्ष रक्ष स्वाहा ॥२॥

(३) ॐ यमदिग्भागे महिषारूढहनुमते खड्ग शक्तिसहिताय चौरव्याघ्रपिशाच० ॥ ३ ॥

(४) ॐ निर्ऋतिदिग्भागे नरारूढहनुमते खंगशक्तिसहिताय चौरव्याघ्र० ॥ ४ ॥

(५) ॐ वरुणदिग्भागे मकरारूढहनुमते प्राणशक्तिसहिताय चौरव्याघ्र० ॥ ५ ॥

(६) ॐ वायुदिग्भागे मृगारूढहनुमते अंकुशशक्तिसहिताय चौरव्याघ्र० ॥ ६ ॥

(७) ॐ कुबेरादिग्भागे अश्वारूढहनुमते गदाशक्तिसहिताय चौरव्याघ्र० ॥ ७ ॥

(८) ॐ ईशानदिग्भागे राक्षसारूढहनुमते पर्वतशक्तिसहिताय चौरव्याघ्रपिशाचब्रह्मराक्षसशाकिनीडाकिनीवैतालसमूहोच्चाटनाय मां रक्ष रक्ष स्वाहा ॥८॥

(९) ॐ अन्तरिक्षदिग्भागे वर्तुलहनुमते मुद्गरशक्तिसहिताय चौरव्याघ्र(०) मां रक्ष रक्ष स्वाहा ॥९॥

(१०) ॐ भूमिदिग्भागे वृश्चिकारूढहनुमते वज्रशक्तिसहिताय चौरव्याघ्रं(०) रक्ष रक्ष स्वाहा ॥१०॥

(११) ॐ बज्रमण्डले हंसारूढहनुमते वज्रशक्तिसहिताय चौरव्याघ्र० मां रक्ष रक्ष स्वाहा ॥११॥

इति दिग्बन्धः ।

(mālā-niantra)

ॐ ह्रीं यीं यं प्रचण्डपराक्रमाय एकादशमुखहनुमते हंस यतिबन्धमतिबन्धवाग्बन्ध भैरुण्डबन्धभूतबन्ध प्रेतबन्धपिशाचबन्धज्वरबंधशूलबन्धसर्वदेवताबन्धराजबन्धमुखबन्ध राजसभाबन्धघोरवीरप्रतापरौद्रभीषणहनुमद्वज्रदंष्ट्राननाय वज्रकुण्डलकौपीनतुलसीवनमालाधराय सर्वग्रहोच्चाटनोच्चाटनाय ब्रह्मराक्षससमूहोच्चाटनाय ज्वरसमूहोच्चाटनाय राजसमूहोच्चाटनाय चौरससमूहो० शत्रुसमूहो० दुष्टसमूहो० मां रक्ष रक्ष स्वाहा ॥ १ ॥

ॐ वीरहनुमते नमः

ॐ नमो भगवते वीरहनुमते पीताम्बरधराय कर्णकुण्डलाद्याभरणालङ्कृतभूषण किरीटबिल्ववनमालाविभूषिताय कनकयज्ञोपवीतिनं कौपीनकटिसूत्रविराजिताय श्रीवीररामचन्द्र मनोभिलाषिताय लंकादिदहनकारणाय घनकुलगिरिवज्रदण्डाय अक्षयकुमारसंहारकारणाय

ॐ यं ॐ नमो भगवते रामदूताय । फट् स्वाहा ॥ २ ॥

ॐ ऐं ह्रीं ह्रौं हनुमते सीतारामदूताय सहस्रमुखराजविध्वंसकाय अंजनीगर्भसम्भूताय शाकिनीडाकिनीविध्वंसनाय किलि किलि चु चुः कारेण विभीषणाय वीरहनुमद्देवताय

ॐ ह्रीं श्रीं ह्रौं ह्रां फट् स्वाहा ॥ ३ ॥

ॐ श्रीवीरहनुमते ह्रौं हूं फट् स्वाहा ॥ ४ ॥

ॐ श्रीवीरहनुमते स्फ्रूं हूं फ स्वाहा ॥ ५ ॥

ॐ श्रीवीरहनुमते ह्रौं हूं फट् स्वाहा ॥ ६ ॥

ॐ श्रीवीरहनुमते स्फ्रूं फट् स्वाहा ॥ ७ ॥

ॐ ह्रां श्रीवीरहनुमते ह्रौं हूं फट् स्वाहा ॥ ८ ॥

ॐ श्रीवीरहनुमते ह्रौं हुं फट् स्वाहा ॥ ९ ॥

ॐ ह्रां पूर्वमुखे वानरमुखहनुमते लं सकलशत्रुसंहारका हूं फट् स्वाहा ॥ १ ॥

ॐ आग्नेयमुखे मत्स्यमुखहनुमते रं सकलशत्रु० हूं फ स्वाहा ॥ २ ॥

ॐ दक्षिणमुखे कूर्ममुखहनुमते म सकलशत्रु० हूं फट् स्वाहा ॥ ३ ॥

This mantra is said to be powerful; in the composite letter hrīm, the first element ह represents Śiva, whose form is Hanumān; the second element र represents Agni who is verily Hanumān (Agni is born from Vāyu, वायोरग्निः); and ई represents energy. The seer of this mantra is Śri-Rāma, the metrical form is Jagatī, and the deity Hanumān. The mantra has this dhyāna:

बालार्काभं त्रिभुवनं क्षोभकान् सर्वराक्षसान् ।
नादेनैव त्रासयन्तं सुग्रीवादिकसेवितम् ।
सुन्दरं रामचरणध्यानं ध्यायेत्समीरजम् ।। १७ ।।

The Puraścharaṇa of this mantra is for 12,000 times.

III. The twelve-lettered mantra

अथास्यान्यं प्रवक्ष्यामि द्वादशार्णं महामनुम् ।
हौं बीजं सम्यगुच्चार्य पूर्वोक्तं कूटपञ्चकम् ।। १८ ।।

हनुमते नमो मन्त्रो रामचन्द्रो मुनिर्मतः ।
जगती छन्द उद्दिष्टं हनुमान्देवता मतः ॥ १६ ॥

बीजं तु पञ्चमं कूटं शक्तिराद्यं तु कूटकम् ।
षड्बीजैः प्रथमैर्न्यासः षडङ्गोऽस्य प्रकीर्तितः ॥ २० ॥

Kūṭa-pañchaka is explained:

आद्यन्ताकृतिवेदार्णा बिन्दुरुद्रस्वरान्विताः ।
हनूमतस्त्वाद्य कूटमेतत्साधक उच्चरेत् ॥ २१ ॥

प्रकृत्याकृतिवेदार्णा बिन्दुरुद्रस्वरान्विताः ।
द्वितीयं कूटमेतत्स्यादाद्यन्ताकृतिवर्णकाः ॥ २२ ॥

विसर्गेन्दुस्वरेपेतास्तृतीयं कूटमुच्यते ।
आद्यन्तसिद्धाकृत्यब्धिवर्णैरीशस्वरान्वितैः ॥ २३ ॥

सानुस्वरैस्तुर्यकूटं साद्यः सौः पञ्चमं मतम् ॥

(हौं ह्स्फ्रें ख्फ्रें ह्स्रौं ह्स्ख्फ्रें ह्सौं हनुमते नमः)

The dhyāna for the mantra is the same as for the previous one.

ध्यानं पूर्वोक्तमेवास्य जपेदर्कसहस्रकम् ।
दशांशं जुहुयाद् व्रीहीन् पयोदध्याज्यसंयुतान् ॥ २४ ॥

IV. The mālāmantra

अथातः संप्रवक्ष्यामि मालामन्त्रं वदेद् ध्रुवम् ।
वज्रकाय वज्रतुण्ड वदेत् कपिलपिङ्गल ॥ २५ ॥

ऊर्ध्वकेश महाबेति ल रक्तमुख कीर्तयेत् ।
तडिज्जिह्व महारौद्र दंष्ट्रोत्कटक हद्वयम् ॥ २६ ॥

करालिने महा प्रोच्य दृढप्रति च हा वदेत् ।
हि लङ्केश्वर वेत्युक्त्वा धाय महा वदेत्परम् ॥ २७ ॥

सेतुबन्धमहाशैलप्रवाह गगनेचर ।
एह्येहि भगवन् प्रोच्य महाबल पराक्रम ॥ २८ ॥

भैरवाज्ञापय प्रोच्य एह्येहीति पदं वदेत् ।
महारौद्रपदं प्रोच्य दीर्घपुच्छेन वेष्टय ॥ २९ ॥

वैरिणं भञ्जय द्वन्द्वं हूँ फड्बाणार्कवर्णवान् ।
मुन्याद्यर्चाप्रयोगादि सर्वं सूर्यार्णववन्मतम् ।। ३० ।।

V. Another mantra from Sādhana-samuchchaya

नमः सबिन्दुमृद्धृत्य हनुमन्तं च ङेऽन्तकम् ।
रुद्रात्मकाय कवचमस्त्रं चेत्येकवर्णकः ।। ३१ ।।

मन्त्रोऽयं हरिणा पूर्वं दत्तो गाण्डीवधन्विने ।
एतस्य साधनं कृत्वा रणे विजयमाप्तवान् ।। ३२ ।।

This mantra is said to have been given to Arjuna by Kṛshṇa on the battle-field (Kurukshetra), and was the cause of the victory for the Pāṇḍavas.

VI. Still another mantra

स्वबीजं पूर्वमुच्चार्य ङेऽन्तं पवननन्दनम् ।
वह्निजायावधि प्रोक्तो मन्त्रोऽयं सुरपादपः ।। ३३ ।।

षड्दीर्घभाजा बीजेन मन्त्रार्णैरङ्गकल्पना ।
स्वरैः काद्यैश्च पाद्यैश्च प्राणायामत्रयं चरेत् ।। ३४ ।।

(ओं हं पवननन्दनाय स्वाहा ।।)

The dhyāna for this mantra involves the visualization of Hanumān's valour on the battle-field.

ध्यायेद्रणे हनूमन्तं कपिकोटिसमन्वितम् ।
धावन्तं रावणं जेतुं दृष्ट्वा सत्वरमुत्थितम् ।। ३५ ।।

लक्ष्मणं च महावीरं पतितं रणभूतले ।
गुरूक्रोधं समुत्पाद्य गृहीत्वा गुरुपर्वतम् ।। ३६ ।।

हाहाकारैः ससदर्पैश्च कम्पयन्तं जगत्त्रयम् ।
आब्रह्म च समाव्याप्य कृत्वा भीमकलेवरम् ।। ३७ ।।

पूजा तु वैष्णवे पीठे लक्षमेकं जपं चरेत् ।
ततः सिद्धिमनुर्मन्त्री साधयोत्सिद्धिमुत्तमाम् ।। ३८ ।।


The general instructions for the mantra-japa are given as follows :

ब्राह्मे मुहूर्ते चौत्त्थाय कृतनित्यक्रियो द्विजः ।
गत्वा नदीं ततः स्नात्वा तीर्थमावाह्य चाष्टधा ॥ ३९ ॥

मूलमन्त्रं ततो जप्त्वा सिञ्चेदादित्यसंख्याया (१२) ।
संपूज्य हनूमन्तं षट्सहस्रं (६,०००) जपमाचरेत् ॥ ४० ॥

एवं सप्तदिनान्ते च समायाति कपीश्वरः ।
रात्रौ त्रिभागशेषायां ददाति वरमीप्सितम् ॥ ४१ ॥

विद्यां वाऽपि धनं वापि राज्यं वा शत्रुनिग्रहम् ।
ददाति साधकेन्द्राय सत्यं सत्यं सुनिश्चयम् ॥ ४२ ॥



BĀLAGRAHA

DHYĀNA-ŚLOKAS FOR HANUMĀN

श्री हनुमद्ध्यानश्लोकाः ॥

१

अञ्जनानन्दनं वीरं जानकीशोकनाशनम् ।
कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥ १ ॥

२

मनोजवं मारुततुल्यवेगं जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यम् श्रीरामदूतं शिरसा नमामि ॥

३

उल्लंध्य सिन्धोः सलिलं सलीलम्
याः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्काम्
नमामि तं प्राञ्जलिराञ्जनेयम् ॥

४

गोष्पदीकृतवाराशिं मशकीकृतराक्षसम् ।
रामायणमहामालारत्नं वन्देऽनिलात्मजम् ॥

५

आञ्जनेयमतिपाटलाननम्
काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनम्
भावयामि पवमाननन्दनम् ॥

६

यत्र यत्र रघुनाथकीर्तनं
तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनम्
मारुतिं नमत राक्षसान्तकम् ॥

७

मर्कटेश महोत्साह सर्वशत्रुहरः परः ।
शत्रुं संहर मां रक्ष श्रीमन्नापद उद्धर ॥
(Hanumat-tantra)

८

दहनतप्तसुवर्णसमप्रभम्
भयहरं हृदये विहिताञ्जलिम् ।
श्रवणकुण्डलशोभिमुखाम्बुजम्
नमत वानरराजमिहाद्भुतम् ॥

९

पञ्चास्यमच्युतमनेकविचित्रवर्णम्
वक्त्रं शशाङ्कशेखरं कपिराजवर्यम् ।
पीताम्बरादिमुकुटैरुपशोभिताङ्गम्
पिङ्गाक्षमाद्यमनिशं मनसा स्मरामि ॥
(Pañchamukha-hanumat-kavacha)

१०

स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिम् ।
कुण्डलद्वयसंशोभिमुखाम्बुजहरिं भजेत् ॥
(Lāngūlāstra-śatruñjaya-mantra)

११

हनूमन्तं महावीरं वायुतुल्यपराक्रमम् ।
मम कार्यार्थमागच्छ प्रणमामि मुहूर्मुहुः ॥

१२

प्रतप्तस्वर्णाभं संरक्तारुणलोचनम् ।
सुग्रीवादियुतं ध्यायेत्पीताम्बरसमावृतम् ॥
गोष्पदीकृतवारीशं पुच्छमस्तकमीश्वरम् ।
ज्ञानमुद्रां च विभ्राणं सर्वालङ्कारभूषितम् ॥

१३

यो वारांनिधिमल्पपल्वलमिवोल्लंघ्य प्रतापान्वितो
वैदेहीघनशोकहरणो वैकुण्ठभक्तप्रियः ।
रणे सोऽयं वानरपुङ्गवोऽवतु सदा चास्मान्समीरात्मजः ॥
(Brahmāṇḍa-purāṇa)

१४

ध्यायेद् बालदिवाकरद्युतिनिभम्
देवेन्द्रप्रमुखैः प्रशंसितयशसं
देदीप्यमानं रुचा ।
सुग्रीवादिसमस्तवानरयुतम्
सुव्यक्ततत्त्वप्रियं संरक्तारुणलोचनं
पवनजं पीताम्वरालंकृतम् ॥

१५

वज्राङ्गं पिङ्गकेशाढ्यं स्वर्णकुण्डलमण्डितम् ।
नियुद्धमुपसंक्रम्य पारावारपराक्रमम् ॥
वामहस्तगदायुक्तं पाशहस्तकमण्डलुम् ।
उद्यद्दक्षिणदोर्दण्डं हनूमन्तं विचिन्तयेत् ॥
(Rāmārchā paddhati)

१६

वन्दे वानरसिंहखगराट् क्रोडाश्ववक्त्रान्वितम् ।
दिव्यालङ्करणं त्रिपञ्चनयनं देदीप्यमानं रुचा ।
हस्ताब्जैरसिखेटपुस्तकसुधाकुम्भाङ्कुशाद्रीन्
हलं खट्वाङ्गं फणिभूरुहं दशभुजं सर्वारिवीरापहम् ॥

१७

ध्यायेद्रणे हनुमन्तं कपिकोटिसमन्वितम् ।
धावन्तं रावणं जेतुं दृष्ट्वा सत्वरमुत्थितम् ।
लक्ष्मणं च महावीरं पतितं रणभूतले ।
गुरुं च क्रोधमुत्पाद्य गुरुपर्वतम् ॥
हाहाकारैः सदर्पैश्च कम्पयन्तं जगत्त्रयम् ।
ब्रह्माण्डं स समावाप्य कृत्वा भीमकलेवरम् ॥

१८

नादबिन्दुकलातीतं उत्पत्तिस्थितिवर्जितम् ।
साक्षादीश्वरसद्रूपं हनूमन्तं भजाम्यहम् ॥

१९

सर्वारिष्टनिवारकं शुभकरं पिङ्गाक्षमक्षापहम् ।
सीतान्वेषणतत्परं कपिवरं कोटीन्दुसूर्यप्रभम् ।
लङ्काद्वीपभयङ्करं सकलदं सुग्रीवसम्मानितम् ।
देवेन्द्रादिसमस्तदेवविनुतं काकुत्स्थदूतं भजे ॥

२०

महाशैलं समुत्पाट्य धावन्तं रावणं प्रति ।
तिष्ठ तिष्ठ रणे दुष्ट घोररावं समुच्चरन् ॥
लाक्षारसारुणं गात्रं कालान्तकयमोपमम् ।
ज्वलदग्निलसन्नेत्रं सूर्यकोटिसमप्रभम् ।
अङ्गदाद्यैर्महावीरैर्वेष्टितं रुद्ररूपिणम् ॥

२१

बुद्धिर्बलं यशो धैर्यं निर्भयत्वमरोगता ।
अजाड्यं वाक्पटुत्वं च हनूमत्स्मरणाद्भवेत् ॥

२२

हनूमानञ्जनासूनुर्वायुपुत्रो महाबलः ।
रामेष्टः फल्गुनसखः पिङ्गाक्षोऽमितविक्रमः ॥

उदधिक्रमणश्चैव सीताशोकविनाशकः ।
लक्ष्मणप्राणदाता च दशग्रीवस्य दर्पहा ।
द्वादशैतानि नामानि कपीन्द्रस्य महात्मनः ।
स्वापकाले पठेन्नित्यं यात्राकाले विशेषतः ।
तस्य मृत्युभयं नास्ति सर्वत्र विजयी भवेत् ॥
(Ānanda-rāmāyaṇa)

२३

अतुलितबलधामं स्वर्णशैलाभदेहम् ।
दनुजवनकृशानुं ज्ञानिनामग्रगण्यम् ।
सकलगुणनिधानं वानराणामधीशम् ।
रघुपति प्रियभक्तं वातजातं नमामि ।
(Rāmacharita-mānasa of Tulasī-dāsa)

२४

अपराजितपिङ्गाक्ष नमस्ते राजपूजित ।
दीने मयि दयां कृत्वा मम दुःखं विनाशय ॥

२५

वामे करे वैरिभिदं वहन्तम् शैलं परे शृंखलहारटङ्कम् ।
दधानमच्छच्छवियज्ञसूत्रम् भजे ज्वलत्कुण्डलमाञ्जनेयम् ॥

२६

सपीतकौपीनमुदाञ्चिताङ्गुलिम् समुज्ज्वलन्मौञ्ज्यजिनोपवीतिनम् ।
सकुण्डलं लम्बशिखासमावृतम् तमाञ्जनेयं शरणं प्रपद्ये ॥

२७

आपन्नाखिललोकार्तिहारिणे श्रीहनुमते ।
अकस्मादागतोत्पातनाशनाय नमोऽस्तुते ॥

२८

सीतावियुक्तश्रीरामशोकदुःखभयापह ।
तापत्रितयसंहारिन्नाञ्जनेय नमोऽस्तुते ॥

२९

आधिव्याधिमहामारिग्रहपीडापहारिणे ।
प्राणापहर्त्रे दैत्यानां रामप्राणात्मने नमः ॥

३०

संसारसागरावर्तकर्तव्यभ्रान्तचेतसाम् ।
शरणागतमर्त्यानां शरण्याय नमोऽस्तु ते ॥

३१

राजद्वारि बिलद्वारि प्रवेशे भूतसङ्कुले ।
गजसिंहमहाव्याघ्रचौरभीषणकानने ।
शरणाय शरण्याय वातात्मज नमोस्तु ते ।
नमः प्लवगसैन्यानां प्राणभूतात्मने नमः ॥

३२

रामेष्टं करुणापूर्णं हनूमन्तं भयापहम् ।
शत्रुनाशकरं भीमं सर्वाभीष्टकलप्रदम् ।
प्रदोषे वा प्रभाते वा ये स्मरान्त्यञ्जनासुतम् ।
अर्थसिद्धिं यशःपूर्तिं प्राप्नुवन्ति न संशयः ॥

३३

वज्रदेहाय कालाग्निरुद्रायामिततेजसे ।
ब्रह्मास्त्रस्तम्भनायास्मै नमः श्रीरुद्रमूर्तते ॥

३४

कारागृहे प्रयाणे च संग्रामे देशविप्लवे ।
स्मरन्ति हनूमन्तं तेषां नास्ति विपत्तदा ॥

३५

पद्मरागमणिकुण्डलत्विषा पाटलीकृतकपोलमस्तकम् ।
दिव्यहेमकदलीवनान्तरे भावयामि पवमाननन्दनम् ॥

३६

उद्यदादित्यसङ्काशमुदारभुजविक्रमम्
कन्दर्पकोटिलावण्यं सर्वविद्याविशारदम् ।
श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम्
अभयं वरदं दोर्भ्यां कलये मरुतात्मजम् ॥

३७

अशेषलङ्कापतिसैन्यहन्ता
श्रीरामसेवाचरणैककर्ता ।
अनेकदुःखाहतलोकगोप्ता
त्वसौ हनूमांस्तत सौख्यकर्ता ॥

३८

कृतक्रोधे यस्मिन्नमरनगरी मङ्गलरवा
नवातङ्का लङ्का समजनि वनं वृश्चति सति ।
सदा सीता कन्तप्रणतिमतिविख्यातमहिमा
हनूमानव्याद्वः कपिकुलशिरोमण्डनमणिः ॥

३९

उद्यन्मार्तण्डकोटिप्रकटरुचियुगं चारुवीरासनस्थम्
मौञ्जीयज्ञोपवीतारुणरुचिरशिखाशोभनं कुण्डलाङ्कम् ।
भक्तानामिष्टदं तं प्रणतमुनिजनं मेघनादप्रमोदम् ।
ध्यायेद्देवं विधेयं प्लवगकुलपतिं गोष्पदीभूतवार्धिम् ॥

४०

मर्कटेश महोत्साह सर्वातङ्कनिवारक ।
अरीन्संहर मां रक्ष सुखं दापय मे प्रभो ॥

४१

उद्यत्कोट्यर्कसङ्काशं जगत्प्रक्षोभकारकम् ।
श्रीरामांघ्रिध्याननिष्ठं सुग्रीवप्रमुखार्चितम् ।
वित्रासयन्तं नादेन राक्षसान् मारुतिं भजेत् ॥

४२

तप्तचामीकरनिभं भीघ्नं संविहिताञ्जलिम् ।
चलत्कुण्डलदीप्तास्यं पद्माक्षं मारुतिं स्मरेत् ॥

४३

वामे शैलं वैरिभिदं विशुद्धं टङ्कमन्यतः ।
दधानं स्वर्णवर्णं च ध्यायेत्कुण्डलिनं हरिम् ॥

४४

जानुस्थवामबाहुं च ज्ञानमुद्रापरं हृदि ।
अध्यात्मचित्तमासीनं कदलीवनमध्यगम् ।
बालार्ककोटिप्रभं ध्यायेज्ज्ञानप्रदं हरिम् ॥

४५

आञ्जनेयं पाटलास्यं स्वर्णाद्रिसमविग्रहम् ।
पारिजातद्रुमूलस्थं चिन्तयेत् साधकोत्तमः ॥

स्वानन्दहेतो भजतां जनानाम्
मग्नः सदा रामकथासुधायाम् ।
असाविदानीं च निषेवमाणो
रामं पतिं किम्पुरुषे किलास्ते ॥

४७

ये ये गुणा नाम जगत्प्रसिद्धा यं तेषु तेषु च विनिर्दिशन्ति ।
साक्षान्महाभागवतप्रवाहम् श्रीमन्तमेनं हनुमन्तमाहुः ॥
(Sumadhva-vijaya)

४८

आदिनारायणं विष्णुं ब्रह्माणँ च वसिष्ठकम् ।
श्रीरामं मारुतिं वन्दे रामदासं जगद्गुरुम् ॥
(Samartha-Rāmadāsa)

४९

मरुत्सुतं रामपदारविन्द-
वन्दारुबृन्दारकमाशु वन्दे ।
धीः शक्तिभक्तिद्युतिसिद्धयो
यं कान्तं स्वकान्ता इव कामयन्ते ॥
(Rāma-charitābdhi-ratna)

५०

स्फटिकाभं स्वर्णकान्तिं द्विभुजं च कृताञ्जलिम् ।
कुण्डलद्वयसंशोभिमुखाम्बुजमहं भजे ।
(Śri-tattva-nidhi)

५१

हनूमान् रामपदाब्जसङ्गी वर्णिवरः शुचिः ।
सञ्जीवनापहर्ता मे दीर्घमायुर्ददात्विह ॥

५२

वामहस्ते महावृक्षं दशास्यकरखण्डनम् ।
उद्यद्दक्षिणदोर्दण्डं हनूमन्तं विचिन्तयेत् ॥

५३

सदा रामरानेति रामामृतं ते
सदाराममानन्द निष्यन्दकन्दम् ।
पिबन्तं नमन्तं सुदन्तं हसन्तं
हनूमन्तमन्तर्भजे तं नितान्तम् ॥

५४

नखायुधभीमाय दन्तायुधधराय च ।
विहङ्गाय शर्वाय वज्रदेहाय ते नमः ॥
(Nāradīya-purāṇa)

५४

ज्वलत्काञ्चनवर्णाय दीर्घलाङ्गूलधारिणे ।
सौमित्रिजयदात्रे च रामदूताय ते नमः ॥

सीतारामपदाम्बुजे मधुवद्यन्मानसं लीयते
सीतारामगुणावली निशिदिवा यज्जिह्वया पीयते ।
सीतारामविचित्ररूपमनिशं युच्च क्षुषोर्भूषणम्
सीतारामसुनामधामनिरतं तं सद्गुरुं सं भजे ॥
(Śrī-Ramāyaṇa-rasāyana)

५७

करशैलशस्त्राय द्रुमशस्त्राय ते नमः ।
बालैकब्रह्मचर्याय रुद्रमूर्तिधराय च ॥
(Śrī-vidyārṇava-tantra)


५८

अञ्जनीमर्भसम्भूत कपीन्द्रसचिवोत्तम ।
रामप्रिय नमस्तुभ्यं हनूमान् रक्ष सर्वदा ॥
(Vallabhāchārya)

५९

मारुतिं वीरवज्राङ्गं भक्तरक्षणदीक्षितम् ।
हनूमन्तं सदा वन्दे राममन्त्रप्रचारकम् ॥
(Siddhānta-dīpikā)

उद्यदादित्यसङ्काशमुदारभुजविक्रमम्
कन्दर्पकोटिलावण्यं सर्वविद्याविशारदम् ।
श्रीरामहृदयानन्दं भक्तकल्पमहीरुहम् ।
अभयं वरदं दोर्भ्यां कलये मरुतात्मजम् ॥
(Eka-mukha-hanumat-kavacha)



MANTRAS RELATING TO HANUMĀN FROM TANTRA ŚĀSTRA

श्री हनुमत्तन्त्रान्तर्गतमन्त्राणि

१. ॐ हं हनुमते नमः ॥

२. ॐ नमो भगवते हनुमते आञ्जनेयाय महाबलाय स्वाहा ॥

३. ॐ हं हनुमते मुख्यप्राणाय नमः ॥

४. ॐ हूं पवननन्दनाय हनुमते स्वाहा ॥

५. ॐ नमो भगवते हनुमते सर्वभूतात्मने स्वाहा ॥

६. ॐ नमो हरिमर्कटमर्कटमहावीराय स्वाहा ॥

७. ॐ भूर्भुवः स्वः श्रीहनुमते नमः ॥

८. ॐ श्री हनुमद्देवतायै नमः ॥

९. ॐ श्री हनुमन्महारुद्राय नमः ॥

१०. ॐ ह्री श्रीं हौं ह्रां फट् स्वाहा ॥

११. ॐ हं नमो हनुमते रामदूताय रुद्रात्मकाय स्वाहा ॥

१२. ॐ अञ्जनी सुताय महावीर्य प्रमथनाय महाबलाय जानकीशोकनिवारणाय श्रीरामचन्द्रकृपापादुकाय ब्रह्माण्डनाथाय कामदाय पञ्चमुखवीरहनुमते स्वाहा ॥

(उद्दिष्टकार्यसाधनार्थ)

१३. ॐ ऐं ह्रीं हनुमते रामदूताय किलिकिलिबुबुकारेण विभीषणाय नमो हनुमद्देवाय ॥

१४. ॐ नमो भगवते वीरहनुमते पीताम्बरधराय कर्णकुण्डलाद्याभरणाय कृतभूषणाय वनमालाविभूषिताय कनकयज्ञोपवीतिने कौपीनकटिसूत्रविराजिताय श्रीरामचन्द्रमनोभिलाषिताय लङ्कादहनकारणाय घनकुलगिरिवज्रदण्डाय अक्षयकुमारप्राणहरणाय ॐ यं ॐ नमो भगवते रामदूताय स्वाहा ॥

१५. ॐ श्रीवीरहनुमते ह्रौं हूं फट् स्वाहा ॥

१६. ॐ श्रीवीरहनुमते स्फ्रें हूं फट् स्वाहा ॥

१७. ॐ श्रीरामपादुकाधराय महावीराय वायुपुत्राय कनिष्ठाय ब्रह्मनिष्ठाय एकादशरुद्रमूर्तये महाबलपराक्रमाय भानुमण्डलग्रसनग्रहाय चतुर्मुखवरप्रदाय महाभयनिवारकाय यं ह्रौं ॐ हं स्फ्रें हं स्फ्रें हं स्फ्रें हं स्फ्रें ॐ वीर ॥

(सर्वारिष्टशमनार्थ)

१८. ॐ नमो वीरहनुमते सर्वाण्यरिष्टानि सद्यः शमय शमय स्वाहा ॥

१९. ॐ वीराञ्जनेय भगवन् मम सर्वकार्याणि साधय साधय सर्वतो मां रक्ष रक्ष स्वाहा ॥

२०. ॐ महावीर हनुमन् सर्वयन्त्रतन्त्रमायाश्छेदय छेदय स्वाहा ॥

(रक्षणार्थ)

२१. ॐ नमो हनुमते रुद्रावताराय वायुसुताय अञ्जनीगर्भसम्भूताय अखण्डब्रह्मचर्यपालनतत्पराय धवलीकृतजगत्त्रितयाय ज्वलदग्नि सूर्यकोटिसमप्रभाय प्रकटपराक्रमाय आक्रान्तदिङ्मण्डलाय यशोऽलङ्कृताय शोभिताननाय महासामर्थ्याय महातेजःपुञ्जविराजमानाय श्रीरामभक्तितत्पराय श्रीरामलक्ष्मणानन्दकारणाय कपिसैन्यप्राकाराय सुग्रीवसख्यकारणाय सुग्रीवसाहाय्यनिमित्ताय ब्रह्मास्त्रब्रह्मशक्तिग्रसनाय लक्ष्मणशक्तिभेदनिवारणाय शल्यविशल्यौषधिसमानयनाय बालोदितभानुमण्डलग्रसनौद्युक्ताय अक्षकुमार छेदनाय वनरक्षाकरसमूहविभञ्जनाय द्रोणपर्वतोत्पाटनाय स्वामिवचनसम्पादितर्जुनसंयुगसङ्ग्रामाय गम्भीरशब्दोदयाय दक्षिणाशामार्तण्डाय मेरुपर्वतरक्षकाय राक्षसीसंघविदारणाय अशोकवनिकाविध्वंसनाय लङ्कापुरीदाहनाय दशग्रीवशिरःकृन्तनाय कुम्भकर्णादिवधकारणाय वालिनिबर्हणकारणाय मेघनादहोमविनाशकाय इन्द्रजिद्वधकारणाय सर्वशास्त्रपारङ्गताय सर्वग्रहनिबर्हणाय सर्वज्वरहराय सर्वभयनिवारणाय सर्वकष्टनिवारणाय सर्वापत्तिनिवारणाय सर्वदुष्टादिविध्वंसकाय सर्वशत्रुच्छेदनाय भूतप्रेतपिशाचडाकिनीशाकिनीध्वंसकाय सर्वकार्यसाधकाय प्राणिमात्ररक्षकाय रामदूताय स्वाहा ॥

(सर्वत्ररक्षार्थ)

२२. ॐ नमो हनुमते रुद्रावताराय विश्वरूपाय अमितविक्रमाय प्रकटपराक्रमाय महाबलाय सूर्यकोटिसमप्रभाय रामदूताय स्वाहा ॥

२३. ॐ नमो हनुमते रुद्रावताराय रामसेवकाय रामहृदयाय लक्ष्मणरक्षकाय दुष्टनिबर्हणाय रामदूताय स्वाहा॥

(वशीकरणार्थ)

२४. ॐ नमो हनुमते रुद्रावताराय सर्वशत्रुसंहारकाय सर्वरोगहराय सर्ववशीकरणाय रामदूताय स्वाहा ॥

(तापत्रयनिवारणार्थ)

२५. ॐ नमो हनुमते रुद्रावताराय आध्यात्मिकाधिदैविकाधिभौतिकतापत्रयनिवारणाय रामदूताय स्वाहा ॥

२६. ॐ नमो हनुमते रुद्रावताराय देवदानवर्षिमुनिवरदाय रामदूताय स्वाहा ॥

२७. ॐ नमो हनुमते रुद्रावताराय भक्तजनमनः कल्पनाकल्पद्रुमाय दुष्टमनोरथस्तम्भनाय प्रभञ्जनप्राणप्रियाय महाबलपराक्रमाय महाविपत्तिनिवारणाय पुत्रपौत्रधनधान्यादि विविधसम्पत्प्रदाय रामदूताय स्वाहा ॥

२८. ॐ नमो हनुमते रुद्रावताराय परयन्त्रमन्त्रतन्त्रत्राटकनाशकाय सर्वज्वरच्छेदकाय सर्वव्याधिनिकृन्तनाय सर्वभयप्रशमनाय सर्वदुष्टमुखस्तम्भनाय सर्वकार्यसिद्धिप्रदाय रामदूताय स्वाहा ॥

२९. ॐ नमो हनुमते रुद्रावताराय वज्रदेहाय वज्रनखाय वज्रमुखाय वज्ररोम्णे वज्रनेत्राय वज्रदन्ताय वज्रकराय रामदूताय स्वाहा ॥

३०. ॐ नमो हनुमते रुद्रावताराय देवदानवयक्षराक्षसभूतप्रेतपिशाचडाकिनीशाकिनी दुष्टग्रहबन्धनाय रामदूताय स्वाहा ॥

(पञ्चमुखहनुमत्तन्त्र)

३१. ॐ नमो हनुमते रुद्रावताराय पञ्चवदनाय पूर्वमुखे सकलशत्रुसंहारकाय रामदूताय स्वाहा ॥

३२. ॐ नमो हनुमते रुद्रावताराय पञ्चवदनाय दक्षिणमुखे करालवदनाय नारसिंहाय सकलभूतप्रेतदमनाय रामदूताय स्वाहा ॥

३३. ॐ नमो हनुमते रुद्रावताराय पञ्चवदनाय पश्चिममुखे गरुडाय सकलविघ्ननिवारणाय रामदूताय स्वाहा॥

३४. ॐ नमो हनुमते रुद्रावताराय पञ्चवदनाय उत्तरमुखे आदिवराहाय सकलसम्पत्कराय रामदूताय स्वाहा॥

३५. ॐ नमो हनुमते रुद्रावताराय ऊर्ध्वमुखे हयग्रीवाय सकलजनवशीकरणाय रामदूताय स्वाहा॥

(ग्रहोच्चाटनार्थ)

३६. ॐ नमो हनुमते रुद्रावताराय सर्वग्रहान् भूतभविष्यद्वर्तमानान् समीपस्थान् सर्वकालदुष्ट बुद्धीनुच्चाटयोच्चाटय परबलानि क्षोभय क्षोभय मम सर्वकार्याणि साधय साधय स्वाहा ॥

३७. ॐ नमो हनुमते रुद्रावताराय परकृतयन्त्रमन्त्रपराहंकारभूतप्रेतपिशाचपरसृष्टिविघ्नतर्जनचेटक विद्यासर्वग्रहभयं निवारय निवारय स्वाहा ॥

३८. ॐ नमो हनुमते रुद्रावताराय डाकिनीशाकिनीब्रह्मराक्षसकुलपिशाचोरुभयं निवारय निवारय स्वाहा ॥

(व्याधिनिवारणार्थ)

३९. ॐ नमो हनुमते रुद्रावताराय भूतज्वरप्रेतज्वरचातुर्थिकज्वर विष्णुज्वरमहेशज्वरं निवारय निवारय स्वाहा ॥

४०. ॐ नमो हनुमते रुद्रावताराय अक्षिशूलपक्षशूलशिरोऽभ्यन्तरशूलपित्तशूलब्रह्मराक्षसशूल पिशाचकुलच्छेदनं निवारय निवारय स्वाहा ॥

(भूतादिग्रहबन्धनार्थ)

४१. ॐ नमो भगवते वीरहनुमते प्रलयकालानलप्रभाज्वलनाय प्रतापवज्रदेहाय अञ्जनागर्भसम्भूताय प्रकट विक्रमवीरदैत्यदानवयक्षरक्षोगणग्रहबन्धनाय भूतग्रहनिबन्धनाय ब्रह्मबन्धनाय शाकिनीकामिनीग्रहबन्धनाय ब्रह्मराक्षसग्रहबन्धनाय चोरग्रहबन्धनाय मारिकाग्रहबन्धनाय ऐह्येहि आगच्छागच्छ आवेशयावेशय मम हृदयं प्रवेशय प्रवेशय स्वाहा ॥

४२. ॐ यं ह्रीं वायुपुत्राय एह्येहि आगच्छागच्छ आवेशयावेशय श्रीरामचन्द्र आवेशयावेशय श्रीरामचन्द्र आज्ञापयति स्वाहा ॥

(सर्वतो विजयार्थ)

४३. ॐ हूं हनुमते रुद्रात्मकाय हूं फट् स्वाहा ॥


४४. ॐ हं पवननन्दनाय हनुमते स्वाहा ॥

४५. ॐ ह्रीं यं ह्रीं रामदूताय रिपुपुरिदहनाय अक्षकुक्षीविदारणाय अपरिमितबलपराक्रमाय रावणगिरिवज्रायुधाय ह्रीं स्वाहा ॥

४६. ॐ भगवते अञ्जनापुत्राय उज्ञयिनिनिवासिने गुरुतरपराक्रमाय श्रीरामदूताय लङ्कापुरीदाहनाय यक्षराक्षससंहारकारिणे हूं फट् स्वाहा ॥

४७. ॐ श्रीं महाञ्जनेय पवनपुत्राऽवेशयाऽवेशय ॐ हनुमते फट् ॥

॥ खड्गरावणनालि ॥



(ज्ञानार्थ)

४८. ॐ नमो हनुमते मम मदनक्षोभं संहर संहर आत्मतत्त्वं प्रकाशय प्रकाशय हूं फट् स्वाहा।।

(बन्धमोचनार्थ)

४९. ॐ हरि मर्कट वामकरे परिमुञ्च मुञ्च शृंखलिकां स्वाहा ।।

५०. ॐ यो यो हनूमन्त फलिफलिति धिगिधिगिति हर हर हूं फट् स्वाहा ।।

५१. ॐ नमो भगवतेऽञ्जनेयाय शृंखलां त्रोटय त्रोटय बन्धमोक्षं कुरु कुरु स्वाहा ।।

५२. ॐ नमो भगवते आञ्जनेयाय महाबलाय स्वाहा ।।

४३. ॐ नमो हनुमते आवेशयाऽवेशय स्वाहा ।।

५४. ॐ नमो हरिमर्कटाय स्वाहा ।।

५५. ॐ नमो रामदूताञ्जनेयाय वायुपुत्राय महाबलाय कोलाहलसकलब्रह्माण्डविश्वरूपाय सप्तसमुद्रनीरालंघनाय पिङ्गलनयनायाऽमितविक्रमाय दृष्टिनिरालंकृताय सञ्जीविनीसञ्जीविताङ्गदलक्ष्मणमहाकपिसैन्यप्राणदाय रामेष्टाय स्वाहा ।।

(सम्पत्प्राप्त्यर्थ)

५६. ह्रीं ह्रीं हूं ह्रों ह्रः हनुमते श्रियं देहि दापय दापय ह्रां ह्रीं हूं ह्रें ह्रों ह्रः श्रीं स्वाहा ।।

५७. ॐ नमो हनुमते रुद्रावताराय सकलसम्पत्कराय स्वाहा ।।

५८. ॐ हं वननन्दनाय रमेराम रमेराम रमेरामाः ह्रीं श्रीं क्लीं ॐ स्वाहा ।।

५९. ॐ श्रीं ओं ह्रीं श्रीं ह्रीं क्लीं श्रीं वित्तेश्वराय हनुमद्देवताय श्रीं ह्रीं ऐं ॐ स्वाहा ।।

(स्वप्नदृष्टान्तार्थं ६१-६२)

६०. ॐ शिव हरि मर्कट मर्कटाय स्वाहा ।।

६१. ॐ हरि मर्कट मर्कटाय स्वप्नं दर्शय दर्शय ॐ स्वाहा ।।

(भयनाशनार्थं ६३-६५)

६२. ॐ नमो भगवते सप्तवदनाय आद्यकपिमुखाय वीर हनुमते सर्वशत्रुसंहारणाय ठं ठं ठं ठं ठं ठं ठं ॐ नमः स्वाहा ।।

६३. ॐ नमो भगवते सप्तवदनाय द्वितीय नारसिंहास्याय अत्युग्रतेजोवपुषे भीषणाय भयनाशनाय हं हं हं हं हं हं हं ॐ नमः स्वाहा ।।

६४. रं हरिमर्कट हरिमर्कटाय भूतप्रेतब्रह्मराक्षसवेतालादिनाशय नाशय मर्कट मर्कटाय हरि हूं फट्।।

६५. ॐ नमो हनुमते अञ्जनीगर्भसम्भूताय रामलक्ष्मणानन्दकराय कपिसैन्यप्रकाशनाय पर्वतोत्पाटनाय सुग्रीवामात्याय रणपरोद्धाटनाय कुमारब्रह्मचारिणे गम्भीरशब्दोदयाय ॐ ह्रां ह्रीं ह्रूं सर्वदुष्टनिवारणाय सर्वभूतप्रेतडाकिनीशाकिनीनिवारणाय ॐ ह्रां ह्रीं ह्रूं फट् ॥

(वादविजयार्थ)

६६. ॐ नमो भगवते आञ्जनेयाय महाबलाय स्वाहा ॥

(वेतालसिद्ध्यर्थ)

६७. हौं ह्स्फ्रं ख्फ्रों ह्स्रों ह्स्ख्फ्रों फ्रें ह्सौः हनुमते नमः ॥

(रक्षार्थ)

६८. अञ्जनीगर्भसम्भूताय कपीन्द्र सचिवोत्तम रामप्रिय नमस्तुभ्यं हनुमन् रक्ष रक्ष सर्वदा ॥

(बन्दिमोक्षार्थ)

६९. ॐ हरि मर्कट मर्कटाय बन्धमोक्षं कुरु स्वाहा ॥

(दृष्टिदोषपरिहारार्थ)

७०. ॐ रं मङ्गल ॐ ॥

७१. हं हनुमते रुद्रात्मकाय हूं फट् ॥

(मायाछेदनार्थ)

७२. ॐ नमो हनुमते रुद्रावताराय परमन्त्र परयन्त्र परतन्त्रमूढघातत्राटकचेटकनाशाय सर्वज्वरच्छेदकाय सर्वव्याधिनिकृन्तनाय सर्वभयप्रशमनाय सर्वदुष्टमुखस्तम्भनाय सर्वकार्यसिद्धिप्रदाय रामदूताय हुं हुं हुं फट् फट् ॥

(हनुमद्गायत्री)

७३. रामदूताय विद्महे वायुपुत्राय धीमहि तन्नो हनुमान् प्रचोदयात् ॥

(सामर्थ्यावाप्त्यर्थ)

७४. ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं वज्रकायाय लङ्केश्वरवधाय महासेतुबन्धाय महाशैल प्रवाह गगनेचर एह्येहि महाबलपराक्रमाय भैरवायाज्ञापय एह्येहि महारौद्र दीर्घपुच्छेन वेष्टय वैरिणो भञ्जय हूं फट् ॥

(षट्कर्मसिद्ध्यर्थ)

७५. १. (आकर्षणार्थ)

ॐ नमो मर्कट मर्कटाय लुं लुं लुं लुं लुं लुं लुं - आकर्षितं सकल सम्पत्कराय हरि मर्कट मर्कटाय ॐ ॥

२. (वशीकरणार्थ)

ॐ नमो हनुमते ऊर्ध्वमुखाय हयग्रीवाय रुं रुं रुं रुं रुं रुं रुं रुद्रमूर्तये प्रयोजननिर्वाहकाय स्वाहा ॥

३. (मारणार्थ)

रं ह्रां रं ह्रीं रं ह्रूं रं ह्रीं रं ह्रूं रं ह्रैं रं ह्रौं रं ह्रः रुद्रावतराय शत्रुसंहारणाय रं ह्रां रं ह्रीं रं ह्रूं रं ह्रैं रं ह्रौं रं ह्रः फट् स्वाहा ॥

४. (विद्वेषणार्थ)

ॐ हरि मर्कट मर्कटाय बं बं बं बं बं अमुकामुकं विद्वेषय विद्वेषय हूं फट् ॥

५. (स्तम्भनार्थ)

ॐ नमो हनुमते पञ्चवदनाय टं टं टं टं टं अमुकं स्तम्भय स्तम्भय टं टं टं टं टं हूं फट्॥

६. (मोहनार्थ)

ॐ ऐं श्रीं ह्रां ह्रीं ह्रूं ह्स्फ्रें ह्स्रौं हस्फ्रें ह्सौं ॐ हनुमते अमुकं मोहय मोहय हुं फट् ॥

(त्रिदोषसंनिपातनिवृत्त्यर्थ)


७६. ॐ हनुमते श्रीरामदूताय नमः ॥
आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥

(हार्दचक्रजागरणार्थ)

७७. गुरवे मम अञ्जनीसूनवे नमः ॥

(सर्वमनोरथपूरणार्थ)

७८. ॐ नमो भगवते महावीराय श्रीमते
सर्वकामप्रदाय हुं स्वाहा ॥



श्री हनुमद्बडवानलस्तोत्रम्


ओं अस्य श्रीहनुमद्बडवानलस्तोत्रमन्त्रस्य श्रीरामचन्द्र ऋषिः । श्रीबडवानलहनुमान् देवता । समस्तरोगप्रशमनार्थं आयुरारोग्यऐश्वर्याभिवृद्ध्यर्थं समस्तदुरितनिवारणार्थं श्रीसीतासमेतराचन्द्रप्रीत्यर्थं श्रीहनुमद्बडवानलस्तोत्रजपमहं करिष्ये ॥

ॐ ह्रां ह्रीं ॐ नमो भगवते श्रीमहाहनुमते प्रकटपराक्रम सकल दिङ्मण्डल यशोवितान धवलीकृतजगत्त्रितय वज्रदेह रुद्रावतार लङ्कापुरीदहन उदधिबन्धन दशशिरः कृन्तन सीताश्वासन वायुपुत्र अञ्जनीगर्भसम्भूत श्रीरामलक्ष्मणानन्दकर कपिसैन्यप्राकार सुग्रीवसाहाय्यकारण पर्वतोत्पाटन कुमारब्रह्मचारिन् गम्भीरनाद सर्वपापग्रहवारण सर्वज्वरोच्छाटन डाकिनीविध्वंसन ॐ ह्रां ह्रीं ॐ नमो भगवते महावीराय सर्वदुःखनिवारणाय ग्रहमण्डल-भूतमण्डल-सर्वपिशाचमण्डलोच्चाटन भूतज्वरैहिकज्वरद्व्याहिकज्वर-त्र्याहिकज्वर-चातुर्थिकज्वर-सन्तापज्वर-विषमज्वर-तापज्वर-मोहश्वरवैष्णवज्वरान् छिन्दि छिन्दि यक्षराक्षसभूतप्रेतपिशाचान् उच्चाटय उच्चाटय ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः आं हं हं हं औं सौं एह्येहि ॐ हं ॐ हं ॐ हं नमो भगवते श्रीहनुमते श्रवणचक्षुर्भूतानां शाकिनी डाकिनी विषमदुष्टानां सर्वविषं हर हर आकाशभुवनं भेदय भेदय छेदय छेदय मारय मारय शोषय शोषय मोहय मोहय ज्वालय ज्वालय प्रहार प्रहारय सकलमायां भेदय भेदय ॐ ह्रीं ह्रीं ॐ नमो भगवते महाहनुमते सर्वग्रहोच्चाटन परबलं क्षोभय क्षोभय सकलबन्धन-मोक्षणं कुरु कुरु शिरः शूलं गुल्पशूलं सर्वशूलं निर्मूलय निर्मूलय नागपाशानन्तवासुकितक्षक कर्कोटकालियान् यक्षकुल जलगत विलगत रात्रिंचर दिवाचर सर्पान्निर्विषं कुरु कुरु स्वाहा राजभय चोरभय-परयन्त्र-परतन्त्र परमन्त्र परविद्याः छेदय छेदय स्वमन्त्र-स्वयन्त्र-स्वविद्याः प्रकटय प्रकटय सर्वारिष्टान्नाशय नाशय असाध्यं साधय साधय हूं फट् स्वाहा ॥

ॐ नमो भगवते विचित्रवीरहनुमते प्रलयकालानलप्रज्वलनाय प्रतापवज्रदेहाय अञ्जनीगर्भसम्भूताय प्रकटविक्रमवीरदैत्य-दानव-यक्ष-रक्षोगण-ग्रह-बन्धनाय भूतग्रह-बन्धनाय प्रेतग्रहबन्धनाय काकिनीकामिनीग्रहबन्धनाय एह्येहि, आगच्छागच्छ, आवेशयावेशय मम हृदये प्रवेशय प्रवेशय, स्फुर, स्फुर, प्रस्फुर प्रस्फुर सत्यं कथय व्याघ्रमुखबन्धन शत्रुमुखबन्धन सर्पमुखबन्धन सर्वमुखबन्धन नारीमुखबन्धन सभामुखबन्धन लङ्काप्रासादभञ्जन अमुकं मे वशमानय क्लीं क्लीं क्लीं ह्रीं श्रीं श्रीं राजानं वशमानय श्रीं ह्रीं क्लीं स्त्रीणां आकर्षयकर्षय शत्रून्मर्दय मर्दय मारय मारय चूर्णय स्वे स्वे श्रीरामचन्द्राज्ञया मम कार्यसिद्धिं कुरु कुरु ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः फट् स्वाहा विचित्रवीरहनुमन् मम सर्वशत्रून् भस्मसात्कुरु कुरु हन हन हूं फट् स्वाहा ॥

असाध्यसाधक स्वामिन् असाध्यं तव किं वद।
रामदूत महोत्साह मामभीष्टं प्रसाधय ॥

चित्र ३२ : हनुमत्धारण यन्त्र (पृ. ४११)



108 NAMES OF HANUMĀN

(from Kālikā-rahasya)

श्रीमदाञ्जनेयाष्टोत्तरशतनामावलिः ॥


आञ्जनेयो महावीरो हनुमान्मारुतात्मजः ।
तत्त्वज्ञानप्रदः सीतादेवीमुद्रप्रदायकः ॥ १ ॥

अशोकवनिकाछेत्ता सर्वमायाविभञ्जनः ।
सर्वबन्धविमोक्ता च रक्षोविध्वंसकारकः ॥ २ ॥

परविद्यापरीहारः परशौर्यविनाशनः ।
परमन्त्रनिराकर्ता परयन्त्रप्रभेदकः ॥ ३ ॥

सर्वग्रहविनाशी च भीमसेनसहायकृत् ।
सर्वदुःखहरः सर्वलोकचारी मनोजवः ॥ ४ ॥

पारिजातद्रुमूलस्थः सर्वमन्त्रस्वरूपवान् ।
सर्वतन्त्रस्वरूपी च सर्वयन्त्रात्मकस्तथा ॥ ५ ॥



कपीश्वरो महाकायः सर्वरोगहरः प्रभुः ।
बलसिद्धिकरः सर्वविद्यासम्पत्प्रदायकः ॥ ६ ॥

कपिसेनानायकश्च भविष्यच्चतुराननः ।
कुमारब्रह्मचारी च रत्नकुण्डलदीप्तिमान् ॥ ७ ॥

सञ्चलद्वालसन्नद्धलम्बमानशिखोज्ज्वलः ।
गन्धर्वविद्यातत्त्वज्ञो महाबलपराक्रमः ॥ ८ ॥

कारागृहविमोक्ता च शृंखलाबन्धमोचकः ।
सागरोत्तारकः प्राज्ञो रामदूतः प्रतापवान् ॥ ९ ॥

वानरः केसरीसुतः सीताशोकनिवारकः ।
अञ्जनागर्भसम्भूतो बालार्कसदृशाननः ॥ १० ॥

विभीषणप्रियकरो दशग्रीवकुलान्तकः ।
लक्ष्मणाप्राणदाता च वज्रकायो महाद्युतिः ॥ ११ ॥

चिरञ्जीवी रामभक्तो दैत्यकार्यविघातकः ।
अक्षहन्ता काञ्चनाभः पञ्चवक्त्रो महातपः ॥ १२ ॥

लङ्किणीभञ्जनः श्रीमान् सिंहिकाप्राणभञ्जनः ।
गन्धमादनशैलस्थो लङ्कापुरविदाहकः ॥ १३ ॥

सुग्रीवसचिवो धीरः शूरो दैन्यकुलान्तकः ।
सुरार्चितो महातेजा रामचूडामणिप्रदः ॥ १४ ॥

कामरूपी पिङ्गलाक्षो वार्धिमैनाकपूजितः ।
कबलीकृतमार्तण्डमण्डलो विजितेन्द्रियः ॥ १५ ॥

रामसुग्रीवसन्धाता महारावणमर्दनः ।
स्फटिकाभो वागधीशो नवव्याकृतिपण्डितः ॥ १६ ॥


चतुर्बाबहुर्दीनबन्धुर्महात्मा भक्तवत्सलः ।
सञ्जीवनगाहर्ता शुचिर्वाग्मी दृढव्रतः ॥ १७ ॥

कालनेमिप्रमथनो हरिमर्कटमर्कटः ।
दान्तः शान्तः प्रसन्नात्मा शतकण्ठमदापहृत् ॥ १८ ॥

योगी रामकथालोलः सीतान्वेषणपण्डितः ।
वज्रदंष्ट्रो वज्रनखो रुद्रवीर्यसमुद्भवः ॥ १९ ॥

इन्द्रजित्वर्पितामोघब्रह्मास्त्रविनिवारकः ।
पार्थध्वजाग्रसंवासी शरपञ्जरभेदकः ।
दशबाहुर्लोकपूज्यो जाम्बवत्प्रीतिवर्धनः ॥ २० ॥

इत्येवं श्रीहनुमतो नाम्नामष्टोत्तरं शतम् ।
यः पठेच्छृणुयान्नित्यं सर्वान्कामानवाप्नुयात् ॥ २१ ॥



HANUMĀN-MANTRAPRAYOGA

(from Mantra-mahodadhi)

हनुमन्मन्त्र प्रयोग विधिः

(Mantraoddhāra)

अथोच्यन्ते हनुमतो मन्त्राःस्वर्वेष्टसिद्धये ।
इन्द्रस्वरेन्दुसंयुक्तो वराहोहसफाग्रयः ॥ १ ॥

हौं is the first seed; ह् स् फ् र् = हस्फ्रें is the second seed)

झिण्टीशबिन्दुसंयुक्ताद्वितीयं बीजमीरितम् ।
गदी(ख)पान्ताग्निरुद्रेन्दुसंयुतः स्यात्तृतीयकम् ॥ २ ॥

(ख, फ, agni र् = ख्फ्रें is the third seed)

हसरासमुचन्द्राढ्याश्चतुर्थंहसखाःफराः ।
(ह् स् र् = ह्स्त्रौं is the fourth seed)
(ह् स् ख् फ् र् = हस्ख्फ्रें is the fifth seed)
शिवेन्द्राढ्याःपञ्चमः स्याद्धसौमबिन्दुगौपरम् ॥ ३ ॥
(ह् स् = ह्सों is the sixth seed)

ङेयुतोहनुमाऽन्हार्दं (नमः) मन्त्रोऽयं द्वादशाक्षरः ।
१. हौं हृदयाय नमः
२. हस्फ्रें शिरसे स्वाहा ।
३. ख्फ्रें शिखायै वषट् ।
४. ह्स्त्रौं कवचाय हुं ।
५. हस्ख्फ्रें नेत्रत्रयाय वौं षट् ।
६. ह्सों अस्त्राय फट् हनुमते नमः ॥
रामचन्द्रो मुनिश्चास्य जगतीछन्द ईरितम् ॥ ४ ॥

हनुमान्देवता बीजं षष्ठं शक्तिद्वितीयकम् ।
षड्बीजैरङ्गषट्कं स्यान्मूर्ध्नि भाले दृशोर्मुखे ॥ ५ ॥
(Shaḍaṅga-nyāsa)

कण्ठे च बाहुद्वितये हृदि कुक्षो च नाभितः ।
लिङ्गे जानुद्वये वर्णान्क्रमान्न्यसेत् ॥ ६ ॥
(Pada-nyāsa)

षड्बीजानि पदद्वन्द्वे मूर्ध्नि भाले मुखे हृदि ।
नाभावूर्वोर्जङ्घयोश्च पादयोर्विन्यसेत्क्रमात् ॥ ७ ॥

(Dhyāna)

बालार्कायुततेजसंत्रिभुवनप्रक्षोभकं सुन्दरं
सुग्रीवादिसमस्तवानरगणैः संसेव्यपादाम्बुजम् ।
नादेनैव समस्तराक्षसगणान्संत्रासयन्तं प्रभुं
श्रीमद्रामपदाम्बुजस्मृतिरतं ध्यायामि वातात्मजम् ॥ ८ ॥

(Japa and homa)

एवं ध्यात्वा जपेदर्कसहस्रं जितमानसः ।
दशांशं जुहुयाद् व्रीहीन्पयोदध्याज्यसंयुताम् ॥ ९ ॥

(aṅga-pūjā in āvaraṇa)

केसरेष्वङ्गपूजा स्याद्दलेष्वन्यांस्तदाह्वयान् ॥ १० ॥

रामभक्तो महातेजा कपिराजो महाबलः ।
द्रोणाद्रिहारको मेरुपीठकार्चनकारकः ॥ ११ ॥

दक्षिणाशाभास्करश्चसर्वविघ्ननिवारकः ।
एवं नामानिसम्पूज्य दलाग्रेषु च वानरान् ॥ १२ ॥

सुग्रीवमङ्गदं नीलं जाम्बवन्तं नलं तथा ।
सुषेणं द्विविदं मैन्दं पूजयेद्दिक्पतीनपि ॥ १३ ॥

(Mantra-prayoga)

एवं सिद्धे मनौ मन्त्री स्वपरेष्टं प्रसाधयेत् ।
कदलीबीजपूराम्रफलैर्हुत्वा सहस्रकम् ॥ १४ ॥

द्वाविंशतिब्रह्मचारिविप्रान्सम्भोजयेदथ ।
एवं कृते महाभूतविषचौराद्युपद्रवाः ॥ १५ ॥

नश्यन्ति क्षणमात्रेण विद्वेषिग्रहदानवाः ।
अष्टोत्तरशतं वारिमन्त्रितं विषनाशनम् ॥ १६ ॥

रात्रौ नवशतं मन्त्रं जपेद्दशदिनावधि ।
यो नरस्तस्य नश्यन्ति राजशत्रूत्थभीतयः ॥ १७ ॥

अभिचारोत्थभूतोत्थज्वरे तन्मन्त्रितैर्जलैः ।
भस्मभिः सलिलैर्वापि ताडयेज्ज्वरिणः क्रुधा ॥ १८ ॥

दिनत्रयाज्ज्वरान्मुक्तःससुखं लभते नरः ।
तन्मन्त्रितौषधं जग्ध्वा नीरोगो जायते ध्रूवम् ॥ १६ ॥

तन्मन्त्रितं पयः पीत्वा योद्धुं गच्छेन्मनु जपन् ।
तज्जप्तभस्मलिप्ताङ्गः शस्त्रसंघैर्न बाध्यते ॥ २० ॥

शस्त्रक्षतं व्रणः शोफो लतास्फोटोऽपि भस्मना ।
त्रिमन्त्रितेन संस्पृष्टाः शुष्यन्त्यचिरतो नृणाम् ॥ २१ ॥

सूर्यास्तमयमारभ्य जपेत्सूर्योदयावधि ।
कीलकं भस्म चादाय सप्ताहावधि संयतः ॥ २२ ॥

निखनेद्भस्मकीलौ तौ विद्विषां द्वार्यलक्षितम् ।
विद्वेषं मिथआपन्नाः पलायन्तेऽरयोऽचिरात् ॥ २३ ॥

अभिमन्त्रितभस्माम्बुदेहचन्दनसंयुतम् ।
खाद्यादियोजितं यस्मै दीयते स च दासवत् ॥ २४ ॥

क्रूराश्च जन्तवोऽनेन भवन्ति विधिना वशाः ।
ईशानदिक्स्थमूलेन भूतांकुशतरोः शुभाम् ॥ २५ ॥

(magical-rites)
अंगुष्ठमात्रां प्रतिमां प्रविधाय हनूमतः ।
प्राणसंस्थापनं कृत्वा सिन्दूरैः परिपूज्य च ॥ २६ ॥

गृहस्याभिमुखे द्वारे निखनेन्मन्त्रमुच्चरन् ।
भूताभिचारचौराग्निविषरोगनृपोद्भवाः ॥ २७ ॥

सञ्जायन्ते गृहे तस्मिन्न कदाचिदुपद्रवाः ।
प्रत्यहं धनपुत्राद्यैरेधते तद्गृहं चिरम् ॥ २८ ॥

निशि श्मशानभूमिस्थौ भस्मना मृत्स्नयापि वा ।
शत्रोः प्रतिकृतिं कृत्वा हृदि नाम समालिखेत् ॥ २६ ॥

कृतप्राणप्रतिष्ठां तां भिन्द्याच्छस्त्रैर्मनुं जपन् ।
मन्त्रान्ते प्रोच्चरेच्छत्रोर्नाम छिन्धि च भिन्धि च ॥ ३० ॥

मारयेति च तस्यान्ते दन्तैरोष्ठांनिपीड्य च ।
पाण्योस्तले प्रपीड्याथ त्यक्त्वा तां सदनं व्रजेत् ॥ ३१ ॥

एवं सप्तदिनं कुर्वन्हन्याच्छत्रुं शिवावितम् ।
अर्द्धचन्द्राकृतो कुण्डे स्थण्डिले वा हुतं चरत् ॥ ३२ ॥

मुक्तकेशः श्मशानस्थे लवणराजिकायुतैः ।
उन्मत्तफलपुष्पैश्च नखरोमविषैरपि ॥ ३३ ॥

काककौशिकगृध्राणां पक्षैः श्लेष्मातकाक्षजैः ।
समिद्वरैश्चत्रिशतं दक्षिणाशामुखो निशि ॥ ३४ ॥

(Vetāla-sādhanā)
सप्तघस्रानिदं कुर्वन्मारयेद्रिपुमुद्धतम् ।
शतषट्कं जपेद्रात्रौ श्मशाने दिवसत्रयम् ॥ ३५ ॥

ततो वेताल उत्थाय वदेद्भाविशुभाशुभम् ।
उदितं कुरुते सर्वं किङ्करीभूय मन्त्रिणः ॥ ३६ ॥

(Bandī-mochana)
हनुमत्प्रतिमां भूमौ विलिखेत्तत्पुरो मनून् ।
साध्यनाम द्वितीयान्तं विमोचय विमोचय ॥ ३७ ॥

तत्सर्वं मार्जयेद्वामहस्तेनाथ पुनर्लिखेत् ।
एवमष्टोत्तरशतं (108 times) लिखित्वा मार्जयेत्पुनः ॥ ३८ ॥

एवं कृते पराधीनो मुच्यते निगडात्क्षणात् ।
एवं विद्वेषणादीनि कुर्यात्तत्पल्लवं लिखन् ॥ ३९ ॥

(the homa for practical ends)
वश्यार्थे सर्षपैर्होमो विद्वेषे करवीरजैः ।
कुसुमैरिध्मकाष्ठैर्वा जीरकैर्मरिचैरपि ॥ ४० ॥

ज्वरे दूर्वागुडूचीभिर्दध्ना क्षीरेण वा घृतैः ।
शूले होमः कुबेराक्षैरेरण्डसमिधा तथा ॥ ४१ ॥

तैलाक्ताभिश्च निर्गुण्डीसमिद्भिर्वा प्रयत्नतः ।
सौभाग्ये चन्दनैश्चन्द्रैरोचनैलालवङ्गकैः ॥ ४२ ॥

सुगन्धिपुष्पैर्वस्त्राप्त्यै तत्तद्धान्यै तदाप्तये ।
तत्पादरजसा राजीलवणाक्तेन मृत्यवे ॥ ४३ ॥

(Phala)
किम्बहूक्तैर्विषे व्याधौ शान्तौ मोहे च मारणे ।
विवादे स्तम्भने द्यूतभूतभीतौ च सङ्कटे ॥ ४४ ॥

वश्ये युद्धे नृपद्वारे समरे चौरसङ्कटे ।
मन्त्रोयं साधितो दद्यादिष्टसिद्धिं ध्रुवं नृणाम् ॥ ४५ ॥

(Dhāraṇa-yantra)
वक्ष्ये हनुमतो यन्त्रं सर्वसिद्धिप्रदायकम् ।
वलयत्रितयं लेख्यं पुच्छाकारसमन्वितम् ॥ ४६ ॥

साध्यनाम लिखेन्मध्ये पाशबीजप्रवेष्टितम् ।
उपर्यष्टदलं कृत्वा वर्मपत्रेषु संलिखेत् ॥ ४७ ॥

वलयं बहिरालिख्य तद्बहिश्चतुरस्रकम् ।
चतुरस्रस्य रेखाग्रे त्रिशूलानि समालिखेत् ॥ ४८ ॥

भूपुरस्याष्टवज्रेषु हसौबीजं तु लिखेत्ततः ।
कोणेष्वं कुशमालिख्य मालामन्त्रेण वेष्टयेत् ॥ ४९ ॥

तत्सर्वं वेष्टयेद्यन्त्रं वलयत्रियेन च ।
वस्त्रे शिलायां फलके ताम्रपात्रे थ कुड्यके ॥ ५० ॥

भूर्जे वा ताडपत्रे वा रोचनानाभिकुंकुमैः ।
यन्त्रमेतत्समालिख्य त्यक्ताशो ब्रह्मचर्यवान् ॥ ५१ ॥

कपेः प्राणान्प्रतिष्ठाप्य पूजयेत्तं यथाविधि ।
सर्वदुःखनिवृत्त्यै तद्यन्त्रमात्मनि धारयेत् ॥ ५२ ॥

ज्वरमार्यभिचारघ्नं सर्वोपद्रवशान्तिकृत् ।
योषितामपि बालानां धृतं जनमनोहरम् ॥ ५३ ॥

(mālā-mantra)
मालामन्त्रमथो वक्ष्ये प्रणवोवाग्घरिप्रिया ।
दीर्घत्रयान्विता माया पूर्वोक्तं कूटपञ्चकम् ॥ ५४ ॥

तारो नमोहनुमते प्रकटान्ते पराक्रम ।
आक्रान्तदिङ्मण्डलतोयशोवीति चतान च ॥ ५५ ॥

धवलीकृतवर्णान्ते जगत्त्रितयवज्र च ।
देहज्वलदग्निसूर्यकोट्यन्ते तु समप्रभ ॥ ५६ ॥

तनूरुहपदंरुद्रावतारपदमीरयेत् ।
लङ्कापुरीदहान्तेनोदधिलङ्घनवर्णकाः ॥ ५७ ॥

दशग्रीवशिरः पश्चात्कृतान्तकपदं ततः ।
सीताश्वासनवाय्वन्ते सुतशब्दमुदीरयेत् ॥ ५८ ॥

अञ्जनागर्भसम्भूतश्रीरामान्ते तु लक्ष्मणा ।
नन्दकान्ते रकपिचसैन्यप्राकारवर्णकाः ॥ ५९ ॥

सुग्रीवसख्यकावर्णारणवालिनिबर्हण ।
कारणद्रोणपर्वान्तेतोत्पाठनपदं वदेत् ॥ ६० ॥

अशोकवनवोत्यन्तदारणाक्षकुमारक ।
च्छेदनान्ते वनपदं रक्षाकरसमूह च ॥ ६१ ॥

विभञ्जनान्ते ब्रह्मास्त्रब्रह्मशक्तिग्रसेतिच ।
लक्ष्मणान्ते शक्तिभेदनिवारणपदं पुनः ॥ ६२ ॥

विशल्यौषधिवर्णान्ते समानयनवर्णकाः ।
बालोदितान्ते भान्वते मण्डलग्रसनेति च ॥ ६४ ॥

मेघनादोंतहोमान्ते विध्वंसनपदं वदेत् ।
इन्द्रजिद्वधकारान्तेण सीतारक्षकेति च ॥ ६४ ॥

राक्षसीसंघवर्णान्ते विदारण च कुम्भ च ।
कर्णादिवधब्दान्ते परायणपदं वदेत् ॥ ६५ ॥

श्रीरामभक्तिशब्दान्ते तत्परेति समुद्र च ।
व्योमद्रुमलंघनेति महासामर्थ्यमेति च ॥ ६६ ॥

महातेजः पुंजवीत्यंते राजमानपदं पुनः ।
स्वामिवचनसम्पादितार्जुनान्ते च संयुगे ॥ ६७ ॥

सहायान्ते कुमारेति ब्रह्मचारिन्पदं वदेत् ।
गम्भीरशब्दोऽत्रिर्वायुर्दक्षिणाशापदं पुनः ॥ ६८ ॥

मार्तण्डमेरुशब्दांते सकलेति पदं वदेत् ।
पीठिकार्चनशब्दांते सकलेति पदं पुनः ॥ ६९ ॥

मन्त्रागमाचार्य्य मम सर्वग्रहविनाशन ।
सर्वज्वरोच्चाटनेति सर्वविषविनाशन ॥ ७० ॥

सर्वापत्तिनिवारणसर्वदुष्टेति संपठेत ।
निबर्हणपदं सर्वव्याघ्रादिभयतत्परम् ॥ ७१ ॥

निवारणसर्वशत्रुच्छेदनेति पदं मम ।
परस्य च त्रिभुवनपुंस्त्रीनपुंसकात्मकम् ॥ ७२ ॥

सर्वं जीवपदं पश्चाज्ञातंवशययुग्मकम् ।
ममाज्ञाकारकं पश्चात्संपादय पदद्वयम् ॥ ७३ ॥

नानानामपदं धेयान्सर्वान्राज्ञःससंपठेत् ।
परिवारान्ममेत्यन्ते सेवकान्कुरु युग्मकम् ॥ ७४ ॥

सर्वशस्त्रास्त्रवीत्यन्ते षाणिविध्वंसयद्वयम् ।
मायादीर्घत्रयोपेताहात्रयंचैहियुग्मकम् ॥ ७५ ॥

विलोमपञ्चकूटानि सर्वशत्रून्हनद्वयम् ।
परदान्तेलानि परसैन्यानि क्षोभयद्वयम् ॥ ७६ ॥

मम सर्वकार्य्यजातं साधयद्वितयं ततः ।
सर्वदुष्टदुर्जनान्ते मुखानि कीलयद्वयम् ॥ ७७ ॥

घेत्रयं हात्रयं वर्मत्रितयं फट्त्रयं ततः ।
वह्निप्रियांतो मन्त्रोयं मालासंज्ञोऽखिलेष्टदः ॥ ७८ ॥

अष्टाशीत्युत्तराः पञ्चशतवर्णामनोःस्मृताः ।
महोपद्रवसंपाते स्मृतो यं दुःखनाशनः ॥ ७९ ॥

(pañcha-kūṭa-mantra)
द्वादशार्णान्तिमान्वर्णन्षट्त्यक्त्वैकं तथादिमम् ।
पञ्चकूटात्मको मन्त्रो निखिलाभिष्टसाधकः ॥ ८० ॥

मुनी रामोथ गायत्रीछन्दो देवःकपीश्वरः ।
पञ्चबीजैःसमस्तेन षडंगं मुनिभिः स्मृतम् ॥ ८१ ॥

रामदूतो लक्ष्मणांते प्राणदाताञ्जनासुतः ।
सीताशोकविनाशोऽथ लंकाप्रासादभञ्जनः ॥ ८२ ॥

हनूमदाद्याःपञ्चैते बीजाद्या ङेसमन्विताः ।
षडंगमन्त्राःसंदिष्टा ध्यानपूजादिपूर्वकम् ॥ ८३ ॥

(ॐ) (ऐं) (श्रीं)

(ekādaśākshara-mantra)

तारोवाक्कमलामायादीर्घत्रयसमन्विताः (ह्रां ह्रीं ह्रूं)
पञ्चकूटानि (ङ्स्फ्रें ख्फ्रें ह्सौं ह्स्ख्फ्रें ह्सौः) मन्त्रोऽयं रुद्रार्णोऽभीष्टसिद्धिदः ॥ ८४ ॥

(ashṭādaśākshara-mantra)
अर्चनापूर्ववच्चास्य परो मन्त्रोभिधीयते ।
हृदयं(नमः)भगवान्ङेन्तं(भगवते)आञ्जनेयमहाबलौ (आञ्जनेयाय महाबलाय) ॥ ८५ ॥

तद्वद्वह्निप्रियांतो यं मनुरष्टादशाक्षरः ।
मुनिरीश्वर एवास्यानुष्टुपछन्दःसमीरितम् ॥ ८६ ॥

हनूमान्देवता बीजं हुं शक्तिर्वह्निवल्लभा ।
आञ्जनेयो रुद्रमूर्तिर्वायुपुत्रस्तथैव च ॥ ८७ ॥

अग्निगर्भो रामदूतो ब्रह्मास्त्रविनिवारणः ।
एतैर्ङेन्तैःषडंगानि कृत्वा ध्यायेत्कपीश्वरम् ॥ ८८ ॥

(dhyāna)
दहनतप्तसुवर्णसमप्रभं भयहरं हृदये विहिताञ्जलिम् ।
श्रवणकुण्डलशोभिमुखाम्बुजं नमत वानरराजमिहाद्भुतम् ॥ ८९ ॥

(japa and homa)
अयुतं प्रजपेन्मन्त्रं दशांशं जुहुयात्तिलैः ।
वैष्णवे पूजयेत्पीठे पूर्ववत्कपिनायकम् ॥ ९० ॥

जितेन्द्रियो नक्तभोजी प्रत्यहं साष्टकं शतम् ।
जपित्वाक्षुद्ररोगेभ्यो मुच्यते दिवसत्रयात् ॥ ९१ ॥

भूतप्रेतपिशाचादिनाशायैवं समाचरेत् ।
महारोगनिवृत्त्यै तु सहस्रं प्रत्यहं जपेत् ॥ ९२ ॥

यताशनोऽयुतं नित्यं जपन्ध्यायन्कपीश्वरम् ।
राक्षसौघं विनिघ्नंतमचिराज्जयति द्विषम् ॥ ९३ ॥

सुग्रीवेण समं रामं संदधानं स्मरन्कपिम् ।
प्रजप्यायुतमेतस्य सन्धिं कुर्य्याद्विरुद्धयोः ॥ ९४ ॥

लङ्कां दहन्तं तं ध्यायन्नयुतं प्रजपेन्मनुम् ।
शत्रूणां प्रदहेद् ग्रामानचिरादेव साधकः ॥ ९५ ॥

प्रयाणसमये ध्यायन्हनुमन्तं मनुं जपन् ।
यो याति सोऽचिरात्स्वेष्टं साधयित्वा गृहं व्रजेत् ॥ ९६ ॥

यः कपीशं सदा गेहे पूजयेज्जपतत्परः ।
आयुर्लक्ष्म्यौ प्रवर्द्धेते तस्य नन्श्यन्त्युपद्रवाः ॥ ९७ ॥

शार्दूलतस्करादिभ्यो रक्षेन्मनुरयं स्मृतः ।
प्रस्वापकाले चौरेभ्यो दुष्टस्वप्नादपि ध्रुवम् ॥ ९८ ॥

पवनद्वितयं सद्योजातयुक्तं हनुपदम् ।
महाकालः शशांकढ्यः कामिकाफलफःक्रिया ॥ ९९ ॥

सनेत्राणां तमीनोगसातोगितआयुरा।
षलोहितं रुडाहेति वेदनेत्राक्षरो मनुः (24 letters) ॥ १०० ॥

(plīha-nivāraka-mantra)
प्लीहरोगहरश्चास्य मुन्याद्यं पूर्ववन्मतम् ।
प्लीहयुक्तोदरे स्थाप्यं नागवल्लीदलं शुभम् ॥ १०१ ॥

तदुपर्य्यष्टगुणितं वस्त्रमाच्छादयेत्ततः ।
वंशजं शकलं तस्योपरि मुञ्चेत्कपिं स्मरन् ॥ १०२ ॥

आरण्यप्रस्तरोत्पन्ने वह्नौ यष्टिं प्रतापयेत् ।
बदरीतरुसंभूतां मन्त्रेणानेन सप्तशः ॥ १०३ ॥

तया संताडयेद्वंशं शकलं जठरस्थितम् ।
सप्तकृत्वःप्लीहारोगो नश्यत्येव नृणां क्षणात् ॥ १०४ ॥
(ॐ यो यो हनुमन्त फलफलित धगधगित आयुराषपरुडाह ॥)

पुच्छाकारे सुवसने लेखिन्या कोकिलोत्त्थया ।
अष्टगन्धैर्लिखेद्रूपं कपिराजस्य सुन्दरम् ॥ १०५ ॥

तन्मध्ये प्रादशार्णं तु शत्रुनामयुतं लिखेत् ।
तेन मन्त्राभिजप्तेन शिरोबद्धेन भूमिपः ॥ १०६ ॥

(Vijaya-dhvaja)
जयत्यरिगणं सर्वं दर्शनादेव निश्चितम् ।
युद्धे जिगीषुर्नृपतिः पूर्वोक्तं लेखयेद्ध्वजे ॥ १०७ ॥

ध्वजमादायोपरागे संस्पर्शान्मोक्षणावधि ।
मातृकां जापयेत्पश्चाद्दशांशेन च हावयेत् ॥ १०८ ॥

सर्षपैस्तिलसंमिश्रैःसंस्पर्शान्मोक्षणावधि ।
गजस्थं तं ध्वजं दृष्ट्वा पलायन्तेऽरयोऽचिरात् ॥ १०९ ॥

(rakshā-yantra)
अथो हनुमतो यन्त्रं वक्ष्ये रक्षाविधायकम् ।
लिखेदष्टदलं पद्मं साध्याख्यायुतकर्णिकम् ॥ ११० ॥

दलेष्वष्टार्णमालिख्य मालामन्त्रेण वेष्टयेत् ।
तद्बहिर्मायियावेष्ट्य प्राणस्थापनमाचरेत् ॥ १११ ॥

लिखितं स्वर्णलेखिन्या दले भूर्जतरोःशुभे ।
रोचनाकुंकुमाभ्यां तु वेष्टितं कनकादिभिः ॥ ११२ ॥

सम्पातसाधितं यन्त्रं भुजे वा मूर्ध्नि धारयेत् ।
रणे जयमवाप्नोति व्यवहारे दुरोदरे ॥ ११३ ॥

ग्रहैर्विघ्नैर्विषैःशस्त्रैश्चौरैर्नैवाभिभूयते ।
रोगान्सर्वानपाकृत्य चिरं जीवति भाग्यवान् ॥ ११४ ॥

(Ashṭākshara-mantra)

वियदग्नियुतं दीर्घषट्काद्यं तार सम्पुटम्।
अष्टावर्णो मन्त्र आख्यातो मूलमन्त्रोऽथ कथ्यते॥२२४॥
(ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॐ॥)

(mālā-mantroddhāra)
वज्रकायवज्रतुण्डकपिलेत्यथ पिंगल ।
ऊर्ध्वकेश महावर्ण बल रक्तमुखेति च ॥ ११६ ॥

तडिज्जिह्व महारौद्र दंष्ट्रोत्कटक हद्वयम् ।
करालिने महादृढप्रहारिन्निति वर्णकाः ॥ ११७ ॥

लंकेश्वरवधायान्ते महासेतुपदं ततः ।
बन्धान्ते च महाशैलप्रवाहगगनेचर ॥ ११८ ॥

एह्येहि भगवन्नंते महाबलपराक्रम ।
भैरवाज्ञापयैह्येहिमहारौद्रपदं पुनः ॥ ११९ ॥


दीर्घपुच्छेन वर्णान्ते वेष्टयान्ते तु वैरिणम् ।
भञ्जयद्वितयं फट्प्रणवादिसमीरितः ॥ १२० ॥

बाणनेत्रेन्दुवर्णोयं (१२५) मालामन्त्रो खिलेष्टदः ।
युद्धे जप्तो जयं दद्याद्व्याधौ व्याधिविनाशनः ॥ १२१ ॥

(ॐ वज्रकाय वज्रतुण्ड कपिल पिङ्गल ऊर्ध्वकेश महाबल रक्तमुख तडिज्जिह्व महोरौद्र दंष्ट्रोत्कटक ह ह करालिने महादृढप्रहारिन् लङ्केश्वरवधाय महासेतुबन्ध महाशैल प्रवाह गगनेचर एह्येहि भगवन् महाबलपराक्रम भैरवाज्ञापय एह्येहि महारौद्रदीर्घपुच्छेन वेष्टय वैरिणं भञ्जय भञ्जय हुं फट् ॥)

अष्टाणमालामन्वोस्तुमुन्याद्यर्चं तु पूर्ववत् ।
भूरिणा किमिहोक्तेन सर्वं दद्यात्कपीश्वरः ॥ १२२ ॥

(इति मन्त्रमहोदधौ त्रयोदशस्तरङ्गः)



SARVATRA-JAYADA-YANTRA

KALPATHARU RESEARCH ACADEMY
(A DIVISION OF SRI SRINGERI SHARADA PEETHAM)
BANGALORE

The Kalpatharu Research Academy, Bangalore is an Institution running with the benign blessings of His Holiness Jagadguru Shankaracharya, Sri Sri Sri Bharathi Thirtha Mahaswamiji under the auspicious of Dakshnamnaya Sri Sringeri Sharada Peetham, Established in 1981. Kalpatharu Research Academy has striped across the horizon of Indological Research and Publications with giant steps, and today stands as an Institution known for its unique quality of Research work.

Kalpatharu Research Academy is dedicated to the cause of preservation of ancient heritage of India; it has encouraged Research in the fields of Agama, Veda, Tantra, Jyoutisha, Mantra Sastra, Vastu, Yoga, Shilpa, Ayurveda etc.

Among its prestigious publications (numbering more than seventy till now), are Six Vol's. of Pratima-Kosha, Twelve Vol's of Agama-Kosha, Three Vol's of the Art & Architecture of Indian Temples, and several Koshas like Ganesha-Kosha, Lalita-Kosha and Navagraha-Kosha, Oshadhi-Kosha, Salagrama-Kosha etc.

The Academy has plans of undertaking intensive Research in the field of Veda and Vedanga, and intends publishing "Bharatiya-Samskriti-Sarvasva-Kosha" an encyclopedic work in several volumes dealing with all aspects of Indian Tradition & Culture. It seeks to promote Education, Culture, and Science, Art and learning in all its branches. The approach will be broad based and multi disciplinary.

An extensive, comprehensive and specialist reference library has been built up to assist the Research Workers in the Indological disciplines. A valuable collection of Palm Leaf manuscripts relating to Veda, Vedanta, Vedanga and allied subjects has already been made; the collection work is continuing.

Dakshinamnaya Sri Sringeri Sharada Peetham has been running a Guru-Kula type of Institution on traditional lines to impart Vedic Education at several places. Some of these Institutions are over 100 years old. It is the intention of Kalpatharu Research Academy to take an active part in continuing this age old tradition and act as the Research & Publication wing for these Institutions.

Our ambition is to develop as a National Center for higher learning in Veda, Vedanga and Shastras and facilitate the propagation of unique Sanskrit and Vedic texts in the National and International arena.

This Publication is the seventy-six of its achievement in this field.

Date : 30th March 2001
Sri Vishu Nama Samvatsara
Chaitra Shukla Shashti

V.R. Gowrishankar, B.E., D.I.I.Sc., AMIMA
Chairman